लौकिकप्रयोगेष्वादर्शनात्ः संख्यासंख्येय इति कोशभाष्याद्युक्तेः संख्येयपरत्वेन प्रायः
साधुत्वं क्वचित्संख्यापरत्वेपि संख्येयगतसंख्यारोपेण साधुत्वं॥ अत एवैकस्य द्वित्वे इसा
घर्थे कयोर्द्वयोः केषां बहुषु इति भाष्यप्रयुक्तमिति बोध्यं॥ एकशब्दो द्विशब्दसाहचर्यात्। संख्या
वाच्येव॥ एकग्रहणं त्वेकवचनमुत्सर्गः कर्तव्यस्तेनाव्ययेभ्यः पचतिकल्पमित्यादौ व्यर्थे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ वचनप्रयोगसिद्धिरिति तद्धितश्चेति सूत्रे भाष्ये स्पष्टं ॥ बहुषु ॥ बहुशब्दोऽत्र त्रित्वादिपरा
र्द्धान्तसंख्यानां व्यापको यो धर्मविशेषो बहुत्वं तत्परः । बहुवचनं लाक्षणिकं बहुत्वं धर्मे आ
रोप्य बोध्यं ॥ तेन वैपुल्यवाचिनो न ग्रहणं ॥ दाराः इत्यादौ त्ववयवादिगतबहुत्वस्यावय
विन्यारोपो बोध्यः ॥ स च क्वचिद्वृद्धव्यवहारानुसारेणैवेति नातिप्रसंगः । भर्तृदारयोरपत्ये
जसोरित्यादौ वृत्तौ लुग्द्विवचनमेवारोपप्रमाणाभावात् । अत एव बृद्धेरगुयोरिति संगच्छते ॥ ए
तेनैकस्मिन्नपि गुरुवः समागता इत्यादि समर्थितम् ॥ अन्वर्थसंज्ञत्वे च सिद्धे इदं सूत्रद्वयं
स्पष्टार्थम् ॥ रामाइति ॥ रुसे एकदेशविकृतन्यायेन सुबन्तत्वात्पदत्वात् विसर्गः ॥ सरूपाणां ॥
वृद्धो यूनेति सूत्रादेवकारोऽपकृष्यत इत्याह ॥ सरूपाण्येवेति ॥ तेन जननीपरिछेतृवाचिनो
मातृशब्दयोर्भ्यामिति नैकशेषः ॥ न चैवं विभक्तावित्यव्यर्थम् ॥ यानि सरूपाण्येव तेषु न्यत्वे वो
क्तदोषवारणादिति वाच्यं ॥ हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवा

राम
८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५.

५.

च वृक्ष इति शब्दस्य चैकशेषानापत्तेः॥ एवं च भावेन तद्भिन्नतादौ वैरूप्यात्॥ इष्टानीति। लोके विभ प्रयोगे इति शेषः। एकशेषश्चायमनैमित्तिकत्वे नान्तरंगत्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति एतद्विषये द्वन्द्वप्राप्तिरेव नेति बोध्यम्॥ ननु तन्त्रेणैव सिद्धेरिदं व्यर्थं॥ यथा अक्षाः भज्यन्तां भुज्यन्तां दीव्यन्तामपि सर्वत्राक्षा इति कारकस्य सकृदुपादानेऽपि सर्वत्रान्वयस्तत्र कारणं तु शब्दानां तुल्यरूपता॥ एवमक्षो भज्यन्तां दीव्यतामित्यपि॥ तच्च द्वेधा॥ शब्दतन्त्रमर्थतन्त्रं च॥ शब्दस्य पर्यायपरित्वस्य सहत्वे आद्यं यथा अक्षा इत्यादौ॥ तस्य सहत्वे त्वस्य॥ यथा घटादिः शब्दादेः। तत्राक्षा भज्यन्तां भुज्यन्तां भुज्यन्तामित्यादावन्वयिपदार्थभेदाद्द्वन्द्वप्रसक्ते बोध्यः॥ उच्चारणं तु तन्त्रेण। अन्वयिपदार्थस्यैकत्वे तु एकोपस्थितेर्वान्वयो यथा शाब्दबोधे पदानां प्रत्यासत्तेर्विति चेत् सत्यम्॥ सरूपाणामेकशेष एवेति नियमार्थत्वात्। तत्फलं तु प्रत्यर्थं शब्दनिवेशस्यापि रक्षणेन कदाचित्तादृशप्रयोगे प्रसक्तद्वन्द्वस्य निवृत्तिः॥ स चायं नियमो विभक्तौ परतो यानि सरूपाण्येव तद्विषयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्ल०शे०॥
॥८९॥

सहविवक्षाविषयश्च ॥ अत एव विभक्त्यंतानामेकशेष इति पक्षे द्वंद्वप्रतिषेधो वक्तव्य इत्या
शंक्य चानवकाशादेकशेषो द्वंद्वं बाधिष्यत इति भाष्य उक्तं ॥ किंचासहविवक्षायामपि तत्प्र
वृत्तौ सहविवक्षायां द्वंद्वस्येवाऽन्यत्र कर्मधारयस्यापि बाधापत्तौ सारवसारवोर्मिअर
स्यादिप्रयोगविरोधापत्तिः ॥ असहविवक्षाविषयेण धिषि नंच तत्तंत्रेणाक्षालनाभ्या
पयः धूतं देहि प्रयोजयतो स्यादिनी लोसलस्य धिनानेत्रेत नुवो हरे इति वह्निद्रुमान सहंसे
तिवच्छेष्टमेवेति बोध्यम् । नचासहविवक्षायां तत्रसत्त्वे इति तद्दति गुरुनिर्देशो व्यर्थः ॥ अ
न्यपदार्थावगतये तत्सत्त्वात् ॥ इघस्य धातोः शिति करणे लुगौरवं ॥ एतच्च सूत्रे भाष्ये प्रख्या
ख्यातं ॥ अर्थावर्थौ प्रतिपदर्थानर्थान्प्रति च पत इपि प्रत्यर्थमेवेत्साश्रयणेनाऽनेक
घटादिपदानां साहित्ये वृत्तिरेव नानभिधानात् ॥ एकस्येवसनेकार्थस्य तत्रवृत्तिरभिधा
नस्वाभाव्यादिति तदाशयः ॥ द्विर्वचनेचीत्यादावेकशेषशंकास्तु भाष्ये तत्रपरः ॥ सचोद्या

भाष्यासाम्ये [illegible]
ख्यान्यपि

राम
८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयितुर्वोद्धुस्तावृत्तिरेवेति बोध्यम्॥ एकविभक्तावित्यत्रैकपदं तु स्पष्टार्थं एकस्यामपि विभक्तौ या
नि विरूपाणि तेषां सर्थबोधयितुं॥ ध्वनितं चेदं विभक्तिस्वारूप्य उपलक्षणं भाष्ये एकपदानुच्चार
णेन॥ समाहारद्वंद्वविषये तु नैकशेषः॥ एकवद्भावस्यान्यतरस्यामित्यनेनैकशेषविषयपद
नां समाहारे वृत्त्यभावबोधनात्॥ न ब्राह्मणं हन्या इत्यादौ मा तिपक्षे तेव निर्वाहः॥ अत एव त
त्र व्यक्तिपक्षेपि यं कंचित् ब्राह्मणमहत्वा वृत्तीस्यादिति दूषणं भाष्ये उक्तं॥ एकशेषशब्दार्थश्चेतर
निवृत्तिपूर्वकमवस्थानं तदाह॥ एक एवेति॥ एके तिलुप्तविभक्त्यंतं पृथक्पदं॥ अत एव तत्रस
रूपाणामित्यस्यान्वयः तत्रावस्थानस्य सिद्धत्वात् निवृत्तिरेव विधेया॥ नत्र शिष्यमाणं लुप्य
मानार्थाभिधायीति न्यायेन श्रूयमाणपदद्वयाबोधः॥ धातुषु तु नास्य प्रवृत्तिः॥ एकनि
ष्ठानेकव्यापाराणामिवानेकनिष्ठानामप्येकधातुनैव निवृत्तभेदानां प्रतीत्यानेकधातुप्र
योगाप्रसक्तेः॥ सरूपाणां किं॥ घटपटौ॥ शेषस्येतावन्मात्रेणैव द्विबहोरपि शेषः प्रसज्येत॥

184

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि.शो.दात्तः

वृ इत्येतावदुक्तौ लेके आदेशश्च सार्थः स्यात्॥ तथा चाश्वश्चाश्वश्चेत्यादौ कदाचिल्लघ्वुदात्तेन लघ्वनुदात्तेन रूपसाम्यमादायोभयस्वरितस्यादेशः प्रसज्येत॥ न चाक्षस्यादेवनस्येति फिट् सूत्रेण शाकटाक्ष आद्युदात्तस्य देवनाक्षे पिष इत्यन्तोदात्तस्य चैकशेषे कदाचिदन्तोदात्तस्यापि शेषेः स्यादिति वाच्यं॥ स्वरभिन्नानां यस्योत्तरस्वरविधिरिति वचनेनैव निर्वाहात्॥ तक्तादिदर्शनं नसंख्यावाचिनामेकशेष इति द्वावनभिधानान्न भवतः विंशत्यादौ लिंगत्वे वैकशेष इत्यलं॥ चूडाः॥ आदिर्ञिटुडवः स्यात् आदिरिति षुः प्रत्ययस्यैव स्यात् प्रत्ययस्येति चानुवर्त्तते तदाह॥ प्रत्ययस्याद्यावितिः॥ तेनेवाचारे नेह॥ प्रत्ययेति किं॥ चामरादत्वित्वं मा भूदिति चचुप्रच णपो यादिलोपस्य निमित्तस्य लोपस्य बहिरंगासिद्धत्वात् प्रत्ययादित्वाभावान्नेत्सम्॥ न विभक्तौ॥ हलन्त्यमित्यस्य निषेधोऽयमनित्यमिदं॥ थमोर्मकारपरित्राणार्थाद् इदित्करणान्नेन किमोऽत् द्वे ति सिद्धम्॥ प्राग्दिशीयस्तादयो विभक्तिः॥ अत एव दानीमो मस्य नेत्वमिति नव्याः॥ भाष्ये तु प्राग्दिशीये षस्या प्रवृत्तावुदित्त्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तापरूमित्युत्तरदानीचेतिसूत्रे लोपोव्योरितिलोपेन यकारं प्रश्लिष्येहसंज्ञा वारिता ॥ अन्यत्रानि
स्पन्नस्य फलाभावाच्चैवमेवोक्तं ॥ लोपस्यासिद्धत्वाच्च नासत्यमिति बोध्यं ॥ विभक्तौ किं । अचीय
तु । अतो गुणे ॥ उस्यपदान्तादित्यतोपदान्तादिति एङि पररूपमित्यतः पररूपमिति चानुवर्तते
पुरस्तादिति अतएव नादिचीति रूपग्रहणं चरितार्थं तद्धि रामाः रामानित्यादौ निषेधाभावाय
पररूपेण पूर्वसवर्णदीर्घबाधे हि तद्वैयर्थ्यं स्पष्टमेव ॥ नोत्तरसनिति ॥ अनंतरापेक्षयोत्तरान्व्यव
हिता नित्यर्थः ॥ एकवचनं सं ॥ सुसंबुद्धिरिसुचितम् ॥ संबोधने चेत्यतः संबोधन इत्यनुवृत्तेः स
पुमीबहुवचनेन दोषः । संबुद्धौ अंगस्य गुण इति व्यवहारान्नदंतस्य संज्ञा ॥ तस्मात्पारायणादा
वहष्टार्थमेवं न्यास इति बोध्यं ॥ संबुध्याक्षिप्तस्येति ॥ संबुद्धेः प्रत्ययत्वेन यस्मात्स विहितस्तदा
ख्याशोपस्थितिः ॥ सचात्र योग्यतया पंचम्यंत इति भावः ॥ प्रत्यये गृह्यमाणे यस्मात्स विहितइ
साधुपतिष्ठत इति प्रत्ययग्रहणे यस्मात्स विहित इसादिपरिभाषार्थं इस्यंगस्येति सूत्रे भाष्ये स्पष्टं ॥

186

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ल॰ ह्रो॰॥
॥९१॥
॥नागो जि

मान॰

अनुरूपाक्षेपस्तु नात्र फलाभावात्॥ यथा पीनत्वादिरन्यथानुपपत्त्यानुमीयमानरात्रिभोजनस्य
पीनत्वोपपत्तिः फलं न तथा एतत्सूत्रेतरनुमानेन संबुध्युपपत्तिर्भवति॥ किंच प्रत्ययस्योत्पत्तावं
गापेक्षत्वे पि तज्ज्ञाने तदपेक्षत्वाभावेन शास्त्रे तदाक्षेपे मानाभावः॥ अत एवांगस्येति सूत्रे तत्स्था
ने प्रत्यये रस्याधिकारः कार्य इति पक्षे प्राकरोदित्यादौ उपसर्गात्पूर्वमडादिः स्यादित्याशंक्य प्रत्यय
ग्रहणे यस्मात्स विहितस्तदादेरिति परिभाषोपस्थित्या समाहितं भाष्ये न त्वंगाक्षेपेणेति दिक्॥
अंगस्येत्युत्तरार्थस्य ह्रस्वस्याविति सूत्रात् ह्रस्वस्येत्यनुवर्तते॥ हेकृतरदिति॥ प्रकृत्यकारस्य टिलोपे
नापहाराद्दिति भावः॥ नन्वंगात्परस्याः संबुद्धेः अवयवस्य हल्लोलोप इति उचितं॥ संबुध्याक्षिप्त
स्य संबुद्धेर्वान्वयस्योचितत्वादत आह॥ बुद्धेनेति॥ अत्र परत्वात्पूर्वरूपे उभयत आश्रयणेनांतादि
वद्भावाभावात्तत्स्वीकारेपि ह्रस्वसंबुद्ध्योः पौर्वापर्यव्यवहारासंभवात्ताद्रूप्यानतिदेशाच्च ह्रस्वांतां
गात्परसंबुद्धेरभावान्नलोपो न स्यादेवं चलस्यप्यनुरोधादन्याक्षिप्तस्याप्यन्यत्रान्वय इति भावः॥

राम
९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चऋदृ विकारे ओकदेशन्यायाप्रवृत्तेनोप्रकलाभावो
भाष्यवृत्तिकृत्स्वरसाद् ऋकारान्तगतेन रेफस्य
सत्वेऽध्यासार्थं एकदेशविकृतन्यायेनाचोक्त
इतिपदनाद्ध्यिवृत्ते ओत्वस्य स्त्रीवृत्त्ये ओते
आहेएकेति

एतदर्थमेव हल्ङ्याप्भ्य इत्यत्र संबुद्धेश्चेदिति व्याख्यातं ॥ मस्य संबुद्धित्वाभावात् ॥ अदृदृ विकारे एवं देश-
विकृतन्यायेनापि न संबुद्धित्वं ॥ एकवचनसत्त्वात् संबुद्धिसंज्ञयोरन्तपरिमाणतो निष्ठतया तयो-
स्तेन न्यायेनालाभाच्च ॥ मकारस्यादेशत्वाभावाच्च नात्र स्थानिवद्भावः ॥ अत एव रामामित्या-
दौ सुपि चेति दीर्घो न ॥ न च संबुद्धित्वस्य सकारमात्रनिष्ठत्वेन स्थानिभूतात्वधर्मत्वेनामः सं-
व बुद्धित्वाभावे कथमस्य संबुध्यवयवत्वमिति वाच्यं ॥ सुपः संज्ञायामुकारविशिष्टे सत्त्वेन तद्रूपस्थाप्ये
जायमानैकवचनसंज्ञायां विशिष्टे सत्त्वे न संबुद्धिसंज्ञाया मित्त्वसंज्ञा कारविशिष्टस्यैवादेश्य-
त्वेन तस्यानल्विधित्वात् ॥ एतेनादश्शदेशे नैव नपुंसकत्वामित्यत्र कृत्वेतिव्यर्थमित्यपास्तम् ॥
एङ्ग्रहणं किमिति ॥ हरे विष्णो इत्यादौ अङ्गाधिकारात् परनिमित्तत्वाच्च गुणात् पूर्वं ह्रस्वात्त्वा-
देवसिद्धेः ॥ सेप्रभृतीनां संबोधने प्रयोगसत्त्वे एङ्ग्रहणेनैव सिद्धे प्रत्याहारग्रहणं व्यर्थमि-
प्रत्याहारे निरोधः तिप्रश्नः ॥ हरेइति ॥ सामर्थ्यादेवात्र संनिपातपरिभाषाया ॥ गुणात् संबुद्धेरिति वक्तव्ये एङ्- न गुणत्वो ह्रस्वात्पूर्वं न ह्रस्व ... आ हुः

188

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰ग्रो॰
१२

ह्रस्वग्रहणसामर्थ्याच्च ॥ अत एव हे लक्ष्मि इत्यादौ लोपसिद्धिः ॥ परत्वादिति । अभ्युच्चयः ॥ नित्य
त्वाच्चेति ॥ चेन अनवकाशत्वसंग्रहः ॥ नपुंसके च पयः इत्यादौ अस्यापि लुका बाधः इत्यन्यत्र ॥ अ
मिपूर्वः ॥ पूर्वसवर्णस्य नुडेवेति सिद्धे पूर्वग्रहणं रामम् इत्यादौ द्विमात्रत्वसंवारणाय ॥ लशक्व ॥
समाहारद्वन्द्वः ॥ अतद्धिते किम् ॥ चूर्णललाटाल्लूनं लकारे कर्तीका ॥ क्लिपलं सादिवृद्धिः
स्यात् ॥ आदिग्रहणाद्धूऊः षाकनो न तस्य क्विते गुणो न स्यात् ॥ तस्माङ्ङसः ॥ पुंसीति पंच
म्यर्थे सप्तमी पुंसो विहितस्येत्यर्थः ॥ तत्र विद्यमानाद्धि हितस्येत्यर्थो वा ॥ तस्मादिति विस्मा
रिता नुगाः पञ्च ॥ पुंसीति किं ॥ मतीः ॥ अटकु बाधितुमिति ॥ तेन पर्याणद्ध उपसर्गादसमा
सेपीति णत्वसिद्धिरिति भावः ॥ अयोगवाहानामिति ॥ न विद्यते योगो वर्णसमाम्नाये येषां
तेऽयोगाः ॥ अनुपदिष्टत्वादपरिगृहीतत्वाच्चेत्यर्थः स्वीचते वाहयन्ति प्रयोगं निर्वाहयन्तीति
वाहाः ॥ ते चानुस्वारविसर्गजिह्वामूलीयोपध्मानीययमाः ॥ अत एव रोः कणोत्यादौ विसर्ग

नी

राम
१२

न च न प्रत्यये मि लेन
गृह्यस्वरयोस्स
कृ कारोच्चारणं
व्यर्थमिति वाच्यम्
किं स्वर निःस्वरयोर
पर्यायापादानस्या
पि चकुराप्यत्वात्

एद् इति लोपस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या

जिव्हामूलीरिव्यवधाने णत्वसिद्धिः।। तदुक्तं भाष्ये नार्थोनुमृग्यहणेनाऽनुस्वारेवृतेऽउव्य
वायेइत्येव सिद्धमिति।। आदर्शेनेस्पादौ नुनातिप्रसंगः।। अतिरिक्तव्यवायत्त स्यादिस्पुप
स्थितं निर्दिष्टग्रहणमतत्समभिव्याहारेऽदिव्यतिरिक्ताव्यवहितपरं।। तदुक्तं णत्वेऽ
न्यवायेप्रतिषेधोवक्तव्योनवान्येनव्यवहितत्वादिति ग्रंथेन।। एतदुत्तरमटाव्यवायसेत्वा
त्वा प्रोस्येव।। अटैवव्यवायेइत्यर्थादित्यादिभाष्यमेकदेशिनोऽनिष्टप्रसक्तिपरम्।। चुडुतु
लइत्यव्यवायेनेतिप्रतियोगिज्ञानसापेक्षनिषेधबोधकगुरुन्यासेन सिद्धेट्कुप्वाड्‍·ति
उत्वचारणैरेवव्यवायेइत्यर्थवदत्वात्तस्यास्तद्भिन्नघननानात्।। एतद्ध्वनिर्वमेतं।। भाष्येनु
रषाभ्याम्मितिसूत्रेऽनुवर्त्तमानस्यैतस्य प्रत्याख्यानायव्यवायेइतियोगविभज्य अट्कुप्वा
ङ्‍नुम्मिरित्येतावद्भिरेवाक्षरसमाम्नायिकैर्व्यवायेनान्यैरित्यर्थकं व्याख्यातं न होला
देशेनेस्पादौ प्राप्तिरेवनेतिबोध्यम्।। लेलेरितिणत्वाइत्यर्थः।। पदांतस्य। नभाभूइतिसू

ये ऽक्षरसमाम्नायेपठ्यंतेयेचतैरव्यवायेतेआक्षरसमाम्नायिकाः अत्रबहुव्रीहोदात्त्‌त्व भवार्थेठञ्। प्रयोजनमित्यनेनवार्त्ति

ज्ञानस्येष्टप्रवृत्तिप्रयोजकत्वेः।।

190

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
९३

न्नान्तेति वर्त्तते ॥ अत्र सूत्रे अनंतरस्य साद्विप्रलक्षणपञ्चम्या पानामप्रवृत्तिर्बोध्या ॥ अ
पदांतस्येत्यनुवृत्तेव भाष्ये प्रत्याख्यानात् ॥ यस्मात्प्रत्ययस्मादिति तच्छुद्धा
कांक्षापूरणाय ॥ तदादीति । तत्प्रकृतिरूपमादिर्यस्येत्यर्थः ॥ प्रत्यासत्तिन्यायलब्धार्थ
माह ॥ तस्मिन्प्रत्यये इति ॥ गुणः । कृतात्मसंस्कार इति न्यायेनाज्ञापितस्मिन्निति परिभा
षाप्रवृत्तिः प्रकृतिमात्रस्य तु व्यपदेशिवद्भावेन तदादित्वं बोध्यम् ॥ स्त्रीइयतीति ॥ इदमुदा
हरणं तु पिबस्य छिमिदंध्मांवोधइतिधादेशो तस्य पादे शेरदं छिमोरिती श्रिपस्येति लोपे
ङी पिङ्पतीतिरूपं । न चात्र परत्वात् स्त्रीशब्दस्य यण्याधानिरूपो दोषो न यस्येति लोपस्या
भीयत्वादसिद्धत्वेनात्र तदप्राप्तेरिति वाच्यं ॥ व्याश्रयत्वेनाभीयासिद्धत्वाप्राप्तेः ॥ तत्र
हि समानाश्रयत्वमसिद्धत्वाश्रयशास्त्रसंबंधिनिमित्तसमुदायाभ्यूनानतिरिक्ताश्रयत्वम्

राम
९३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रिच प्रत्ययेति लोपापेक्षया स्त्रिया इति सूत्रे ऽधिकृतस्य स्त्रीशब्दस्यापेक्षा प्रत्यासत्त्या जा
दिप्रत्यय निरूपितांगएवेय इ प्रवृत्त्या स्त्रीशब्दस्य लुक् निरूपितांगत्वे पि न दोषः ॥ विधिग्रहणं नि
देवमनत्ती त्यादाववतोदीर्घाय ज्ञोतिनि ॥ तदादिग्रहणं कुर्वतीत्यादौ विकरणस्य गुणार्थम् ।
प प्रत्ययविशिष्टस्येति ॥ तथा सति भंगेन प्रत्यये परत्वलाभानापत्तौ वक्ष्ये सिद्धिः ॥ किंचुरा
जपुरुष इत्यादौ न लुमतेति निषेधात्पूर्वपदे पदत्वाभावेन नलोपानापत्तिरिति भावः ॥ ततो
धिकृतस्यावेति ॥ देवदत्त ओदनमपाक्षीदित्यादौ देवदत्तादित्याद्येन रंसपं निमि तेकृतस्य लुङः पर्य
तमंगत्वात् । तस्य लुङः परत्वेन देवात्पूर्वमप्यडापत्तिः ॥ अंगसंज्ञायाः प्रत्ययनिमित्तत्वाभा
वेन लुगादि निरूपितांगस्य स्वार्थस्य दुर्लभत्वादिति भावः ॥ टाङसि ॥ अंगस्येति षष्ठ्या अतो
भिस् इस इत्यतोनुवृत्तेनातः इत्यनेन पंचम्यंतेन सामानाधिकरण्यानुरोधात् पंचम्या विपरि
णाम इत्याह ॥ अकारांतादित्ति ॥ अकारात्परेषाम् अंगसंज्ञानिमित्तटादीनाम् इत्यर्थ इति पक्षां

192

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
९४

तरं भाष्ये॥ किंचाद्यंतावदगादिसार्थेपि ब्रासणाभिस्से स्यादवतिप्रसंगः॥ आस्ननलोपस्या
पि पुवोरनाकाचितिसूत्रभाष्योक्तरीत्यालवर्तिविभक्त्यागमात्॥ अर्थवत्परिभाषया
प्रत्ययग्रहणपरिभाषयावा प्रत्ययस्यैव भिसो ग्रहणे तेषामंगाधिकारे पाठो व्यर्थः
भिसः प्रत्ययस्यैव ग्रहणे हि प्रत्यासत्त्यात्तन्निरूपितांगस्य ग्रहणमिति युज्यतेव नु
नान्यथा॥ इदमोनहि अतो भिस ऐस् इत्यत्रांगाधिकारस्य प्रयोजनं भाष्ये दत्तमित्यलं॥ सु
पिच॥ अतो दीर्घो यञीति अनुवर्तते॥ पत्रीत्यत्र नेनाल्त्वात्तदादिविधिरित्याह॥ यञो
दाविति॥ उ॰ प॰॥ चतुर्थ्यैकवचनस्यैव ग्रहणं व्याख्यानादित्याह॥ इत्येतस्येति॥ सन्नि
पातेति॥ उपजीव्यविरोधन्यायमूलेषा॥ संनिपातः संश्लेषः तन्निमित्तको यो विधिः स
तं सन्निपातं यो विहंति स तद्विघातस्यानिमित्तमित्यर्थः॥ न च यञादित्स्वसापेक्षदी आ॰

राम
९४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घेस्य बहिरंगतया असिद्धत्वात्तत्रसन्निपातविघातइतिवाच्यं॥ आरोपितासिद्धलोपिवृस्तु
तस्त् विघातस्यजायमानत्वेनततप्रवृत्तेः। क्रियांतरंगेकर्तव्येबहिरंगासिद्धत्वेपितत्रकृतेऽ
सिद्धत्वेमानाभावः। क्रियातिदेशिकृसंनिपातविघाताभावमादायैवतदप्रवृत्तेगौरीसादौ
संबुद्धिलोपेपिस्थानिवत्वेनह्रस्वनिमित्तविघाताभावात्तत्रैतस्याअतिव्याप्तिपरिभाष्यासं
गतिः। संनिपातस्याशास्त्रीयत्वात्तत्रस्थानिवत्वमितिचेत्तत्रासिद्धत्वमपि थमितिवद॥ कु
पूर्वस्यनिमित्तंययोःसंनिपातस्तयोःसूत्रेउपादानमपेक्षितमितिनुनाग्रहः॥ अतएवदा
त क्षिरिस्यत्राऽकारोत्प्रवृत्तौसन्निपातनिमित्तांगसत्त्वानपायपरिभाषयाऽलोपस्यनिमित्तं
तस्यादिस्थाशंकाऽनित्यत्वेनसमाहितंभाष्येकृत्स्नेजंतसूत्रे॥ नसंगसत्तायामदंतस्यागसं
र रैस्यनमस्ति॥ नचकृष्णायक्रमणोरस्याऽकृत्सावेतिदीर्घे लोपपत्तेरनित्यताज्ञापकत्वक
थमितिवाच्यम्॥ तस्यापिसन्निपातपरिभाषयाऽप्राप्तेः॥ विरोधाभावात्फलेविशेषाभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल.टी.
२५

अभ्यसा च पात परिभाषानित्यत्वे पि सत्यग्रहणं नावश्यकं नि
त्येन नामीति दीर्घेण एत्व बाध्य सिद्धेः तथा स्यादौ चारिता
र्थ्याद् ज्ञापकत्वे कथं सर्वेषामित्यस्य सिद्धिरिति केचित्
वस्तुतः शुद्धौ तरस्येति परिभाषया दीर्घस्याप्यनित्यत्वे
नित्यत्वेन ज्ञाप्यतर तिमसदो च: ॥ २

वाञ्च परत्वेप्यवृद्धिरिति नोपन्यस्तम्॥ तस्मादृदिसादिपर्युदासेनासंख्येव प्रवृत्तिरित्यन्ये॥ सखिशि
मिति॥ ३ तोर्वृद्धीत्यत्तो हलीत्येवानुवर्त्तते संनिपातपरिभाषया रामाणामित्यत्र न दोष
इति प्रश्नः॥ सत्यं ग्रहणमेतत् संनिपातपरिभाषाया अप्रवृत्तिज्ञापनार्थम्॥ तेन सर्वे
षामित्यादावेत्वसिद्धिरित्युत्तरम्॥ तेन बहुवचनेवृद्धिरामस्येति व्याख्यानम्॥ रामाभ्या
मित्यपि प्रसूदाहरणं बोध्यम्॥ बहुवचने ऌलीगिति तु न सूत्रितम् तानयोरिसादे
नुमापत्तेः॥ इति तु गंगे इसादौ गुणो तस्य पंचमीसमासेन सुष्टा निवृत्ता रेइ-त्यस्यापा
सो व्यवधानाद्ध्रस्वः॥ वि सस्याप्राप्तौ संबुद्धिलोपानापत्तेश्च॥ जश्त्वमिति॥ बाधित्वे
ति शेषः॥ अं न सानेचर्त्वस्य पदान्त जश्त्वापवादत्वात्॥ द्वित्वे रूपेति॥ पूर्वत्रासिद्धीयमद्वि
त्वे इति न्यायाच्च र्सोन्तरं द्वित्वं बोध्यं॥ तादेशाद्इति॥ अन्यथा खरि चेति चर्त्वेन सिद्धत्वविंद

तेनोरूपाद्यर्थे
यादलक्त्वेन दोषः

नच्छा नित्यत्वे तुस्या
चत्वभाष्यानुरोधा
दुभयोरादेशत्वेत्व
र्णपरिभाषा प्रव
त्तिस्तदानेदं तग-ये

अपूर्वविधित्वात एवं द चेन्नाशस्ति न्याये नवध्यि शुद्ध भवणान्तरतेनैन पदादस्यादौ चर्त्वस्य जस्त्व
भाव्यकत्वादस्य स्यणत्वस्यादित्वपात्तं जक्षीति सूत्रे षडित्तिर्निर्देशाच्च॥ अनचि चेति रेफ
स्य द्वित्ववारणाय तत्र पाठोन्तः ओ कौ डि न्यायस्वीकारः च दृश्यक वादिति भाष्य: अन्येन्दं दूष
णं यदतनतन्यायस्वीकार स्तग्हीतद्विर्वरस्यत्र नाप्राप्तचर्त्वे बाध्यत्वासाध्यत्वे तत्रस्यात् २

न्यायघ्यक्रमन मिदं न तु फलेविषेधः ध्वांनादेशो न वि
हो पस्तु नस्त्वड् सीस्तून स्य त्व यथा विशेष्यात् ग्व
अन्यथा तत्कारमेवा विदध्यात् तत्पचेष्टाप्रकेय
त्वं वाविशेष्यश्च॥ १

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

195

अनात्त्वादित्यादौ येषा ... ह्रस्व
स्यप्रवृत्यर्थं न
ति बोध्यम् ९७

ङे॰ रामेति ग्रहणे पि नुटा आटा बाध्यते तस्य नुट्
किंमेतिङ॰ व्ययेति सर्वत्र ... त आमुक्त आकास्य
येति सर्व ... त आमस्या ... निरवुधंध ... परिभा
षणानन्यग्रहणं आमो मकारस्य ... णाय अकारः
... व्यत इति स्पष्टं भाष्ये इत्यर्थः ॥ ३

व्यर्थं स्यादिति भावः ॥ ह्रस्व नद्यापः ॥ ह्रस्वनद्याप इति पंचमी ॥ आमि सर्वनाम्नः सुट् इत्यत आमीति वर्तते ॥ तच्च षष्ठ्या विपरिणम्यते नामीति लिंगादित्याह ॥ ह्रस्वान्तादित्यादि ॥ आमस्तु षष्ठी बहुवचनमेव न तु ङे॰ रामादौ इति स्पष्टं भाष्ये ॥ यत्तु नुडिति योगं विभज्य सामान्येन नुड् विधेयः न द्याप इति दीर्घान्ताच्चेन्नद्याप एवेति नियमार्थमिति दीर्घे पुनर्दोषः ॥ हलन्ताच्चेन्न षट्चतुर्भ्य एवेति नियम इति हि तेषु न दोषः एवं च ह्रस्वग्रहणं न कार्यमिति तन्न ॥ नद्याप इत्यस्य स्त्रीलिंगान्नो चेन्नद्याप एवेति नियमपरतया व्याख्यातुं शक्यत्वेन नदीलापूजयोर्ह्रस्वत्वेपि ह्रस्वत्वेन तु इत्यनियमे हेतुतरमानाभावेन च मतीनामित्यादौ नुडनापत्तेः ॥ नामि ॥ ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यनुवर्तते ॥ अंगस्येति विंचमर्णा ॥ नचामि ... स्तु निरवकाशत्वं दीर्घेपि ह्रस्वात् नृणां ... सोत्तस्सामर्थ्यात् भूतपूर्वह्रस्वात् तन्मात्रापनुट् सिद्धः न च नृ च इति दीर्घविकल्पात् नृणामि पि स्वेन नुट् चरितार्थः ॥ नृ च नद्याप इत्यस्य व सिद्धः ॥ तदुक्तं भाष्ये नैकमुदाहरणं सूत्रारंभं प्रयोजयतीति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल.शे.
९६

तिसृणामिति षष्ठी रित्यत्र त्रेरित्यनुवृत्त्या सिद्धमिति भाष्ये एव स्पष्टं ॥ एतेन त्रेस्त्रय आप इति न्या
से भाष्यतात्पर्यमित्यपास्तं ॥ चतसृणामपि चतसृणां इत्यत्र षट्चतुर्भ्य इति सिद्धं ॥ गो। ऐतोनु
दश्रवृत्तौ नुनमानं बहुवचनं तु लाघवार्थं ॥ द्विवचने हि चतुर्भ्यामिति गुरुनिर्देशः स्यात् ॥ ने
त्यमुदाहरणमिति प्रकृतसूत्रभाष्यविरोधश्च ॥ समाहारद्वन्द्वेन निर्देशे कार्ये बहुवचननिर्देश
स्तदर्थ इति न युक्तं ॥ अस्थिदधीति सूत्रे भ्यो नसद्दसादो व्यभिचारात् ॥ न चागाधिकारे पंचम्याय
दृच्यते गृह्यमाणविभक्तेस्तद्धवत्तीति सर्वादिसूत्रभाष्याद्गृह्यमाणद्विहितविभक्तेरित्यर्थका
दस्यानुरोधो गौणे प्रवृत्तिः ॥ षष्ठ्यर्थस्य चापि विहितविशेषणमेवेत्याशयेन परमपंचेत्यादौ लुग
भावमाशंक्य षष्ठ्प्रधानत्वषसंग्यासख्युः समासस्य षष्ठप्रधानत्वेन संख्याप्रकारकसंख्येयवि
शेष्यबोधजनकत्वेन षट्त्वसत्त्वान्न दोष इति तदर्थः ॥ ष्णांतेत्यत्र लोके गणना या प्रसिद्धानामे

प

राम
९६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

197

वग्रहणमित्यत्र न मानं॥ प्रवृत्तेपि तथैव॥ षड्भ्य इत्यादौ पंचम्या विरुद्धविभक्तित्वादंगस्येत्यने
न संबंधायोग्यत्वाद्विहितेत्याद्यध्याहारेण प्रत्ययविशेषणत्वेनेति भाष्योक्तेरिति गोलोनुटोऽप्र
वृत्तिरिवाच्यं॥ नामीतिसूत्रस्थेन भाष्यप्रामाण्यान्नुड्विधायके विहितपदाध्याहारेण षडादि
भ्यः परस्यांगसंज्ञानिमित्तस्यामो नुडित्यर्थेन गोलोपि प्रवृत्तेः॥ अतो भिस इत्यादावंगस्येत्यस्यै
वमन्वयस्यैवांगसंज्ञासूत्रे भाष्ये उक्तत्वादत एव परमचतुर्णामित्यादौ नुट्॥ यद्यप्येवं षड्भ्यो रादि
भ्य इत्यनयोरपि वक्तुं शक्यं तथापि लक्ष्यानुरोधात्तत्र विहितविशेषणं॥ विरुद्धविभक्तिकत्वादिति
भाष्योक्तयुक्तिस्त्वेकदेशिन इति बोध्यं॥ अउत्तरादिभ्यः षड्भ्यो लुगिति भनयोरेव सर्वादिसूत्रे
भाष्योपन्यासात्॥ षड्भ्य इत्यादेः षडर्थगतसंख्याभिधायिन इष्टसोरित्यादिक्रमेणार्थ इति कै
यटोक्तं तु अउत्तरादिभ्य इति सूत्रे भाष्यविरोधादिभिर्दूषयिष्यते॥ न च पदांततामित्यादावतिप्र
संगः॥ ह्रस्वं नाम मात्राकालिकाच्त्वं॥ तत्र सामर्थ्याद्विशेषणीभूतमात्राकालिकासांहोण

१९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमतमात

वभूतपूर्वगत्या आश्रयत्वं न तु विशेष्यभूतमचुत्वांशोपीयस्येषादिति चेन्न॥ नोपधायाः इत्युत्तरार्थत्वा
त्॥ तेन च मण्णामिति दीर्घाभावः सिद्ध इति दिक्॥ परिभाषाविरोधादिति॥ सर्वत्रानित्यत्वाश्रयणे
कथंद्वतः नि मानाभाव इति भावः॥ वृत्तावृत्तप्रसंगित्वात्रामौ नित्यं॥ न च विशेषाभावेन फलाभावान्न वृत्तेतत्रा इत्यस्येपसीत्वा चपः
प्तिरिति वाच्यम्॥ विशेषाभावेन पर्जन्यन्यायेन शास्त्रप्रवृत्तेरिकोऽसलिति सूत्रे भाष्ये उक्तत्वात्।
आयादय इति सूत्रे भाष्ये स्यादिभिः परत्वाद्याद्बाधमाशंक्यानवकाशत्वादायादयः॥ न
च गोपायतीत्यादिरवकाशः अत्रापि शपस्यादेः प्राप्तेः॥ न च नास्ति विशेषः॥ अन्यदिदानीमुच्यते
नास्ति विशेष इति॥ यदुक्तमायादीनां स्यादिभिरप्राप्तो वकाश इति स नास्त्यवकाश इति भाष्योक्ते
श्चेत्यपि बोध्यं॥ आरंभेति॥ पत्नुवृत्तौ नामित्यत्र षट् चतुर्भ्य इति नुट् इति संनिपातपरिभाषा
या अप्राप्तेः सावकाशत्वाहमस्येवेति तन्न॥ नद्येकमित्युक्तन्यायेन कृते नामीत्येव सिद्धे सामा
न्यसूत्रारंभेस्य थार्तात्॥ एवं च नन्ति सूचनत्स्वित्यकरणेन लाघवमिति भावः॥ नुटीति तु नोक्तं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चे उणादीनां व्युत्पन्नत्वपक्षे भृङ्गः कित्रुडितिनिष्पन्नभृंगशब्दे दीर्घापत्तेः॥ इदमेव व्युत्पत्तिपक्षेऽनाप
कमिति दिक्॥ अपदांतस्य॥ षट्त्वे चासिद्धे मूर्धन्यग्रहणमिणः षीध्वमित्यत्र ढत्वविधानार्थं॥ रषा
१५च भ्यामित्यत्रानुवृत्त्यर्थं च॥ तत्र णग्रहणं पदांतस्येति च न कर्तव्यमिति भाष्ये स्पष्टं॥ इण्कोः॥ कुर्ग
ग्रहणं चर्त्वस्यासिद्धत्वात् खक्षुरस्तादर्थं॥ आदेश॥ प्रत्ययशब्दस्तदवयवपरो व्याख्यानात् तु सात्तेः
षनिषेधाल्लिंगाच्च तदाह॥ प्रत्ययावयवे सादि॥ विवृताघोषस्येस्य सादि॥ विवृतरूपाभ्यंतरप्र
८ यत्नवतोऽघोषरूपवाह्यप्रयत्नवतश्चेत्यर्थः॥ ॐ कारवारणायाद्यं॥ ङ्कारवारणाय द्वितीयं॥ रा
मस्येति॥ टाङसीतिसत्रे सकारोच्चारणं स्विण कोरित्यनुवृत्ताविवतान्पर्यग्राहकमिति भावः॥ स
र्वादीनि॥ तद्गुणसंविज्ञानो बहुव्रीहिः॥ आदिशब्दोऽवयववाची तेन सर्वशब्दघटितउ तावयव
भेदः समूहः समासार्थ इति बहुवचनं॥ उद्भूतावयवभेद इत्यस्यारोपितावयवगतसंख्या इत्यर्थः॥
तत्र वैयर्थ्यात् प्रवृत्तावपि अवयवेषु प्रवर्तमाना विशेषात् सर्वशब्देऽपि भवति॥ सर्वनामा नीत्यत्र

K K S U LIBRARY
RAMTEK
441 106
M-1604
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰शे॰
९८

पूर्वपदादिति णत्वं ॥ अत एव निपातनात् ॥ नाम्नामेति णत्वेन तस्य निपातनस्य तद्बाधकत्वात् ण
त्वसहितमसाधुरिति स्पष्टं भाष्ये ॥ प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वार्त्तिकमूलं शब्दस्वरूपवि
शेष्यमादाय तदंतविधिर्ज्ञापकादित्याह ॥ द्वंद्वे चेतीति प्रथमार्थे सप्तमी ॥ द्वंद्वः सर्वनामसंज्ञो नेत्य
र्थः ॥ न हि तदंतविधिं विना समुदाये संज्ञाप्रसक्तिरस्ति या निषिध्येतेति भावः ॥ ननु तदंतसंज्ञा
पि सर्वनामत्वे सर्वनाम्नः स्मै इत्यादिषु सर्वनाम्नो विहितस्य ङे स्मै इत्यर्थाश्रयणे नातिसर्वादौ
दोषाभावादुपसर्जनप्रतिषेधो न कार्य इति भाष्यसूचितं विरुध्येतेति ॥ अत एव वारुचे भाष्ये
पक्षांतरोपादानं ॥ न च तदुक्तपक्षेषु नारुचिरिति भ्रमितव्यं ॥ वृद्धिसंज्ञासूत्रे उपरितुष्या
नूरवलेव पि भावाननाद्धृति र्लिंगेन वैसाहेति वार्त्तिकारं प्रति भाष्योक्तेः ॥ अकचेति ॥ कु
त्सितत्वादि सूत्रोक्तभाष्यरीत्या संख्याकारकाभ्यां पूर्णार्थस्येतरान्वयेन सुबंतादेव तद्धितो
त्पत्तेः प्रत्यासत्त्या सर्वनामप्रकृतिकसुबंतात्तदर्थगतकुत्सादिविवक्षायां सर्वनामावयवटेः
नित्ये च ॥ प्रयोजनं सर्वनामाव्ययसंज्ञायामिति तदंतविधिस्तत्र स्थवार्त्तिकविरोधे नास्य भाष्यस्यैकदेशयुक्ति

सूतो वचनमि
पदन्त सारम

ष्य चेन

क

सारम

राम
१८

(B) Acc. No. ~~2976~~ M-1604

लघुशब्देन्दुशेखरः

KKSU LIBRARY RAMTEK 441 106 M-1604 Dist. Nagpur

(B)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रागङ्गेति स्यर्थात्तदंत संज्ञाभावे तदसिद्धिरिति भावः॥ एवमेवं लाघवसिद्धि नोंध्या॥ एतेनावय
वनिष्ठसर्वनामत्वेन तत्सिद्धिरिसपास्तं॥ जसः शी॥ दीर्घोच्चारणं उत्तरार्थं वारिणीति॥ अ
दन्तादिति॥ परस्येत्यनेनान्वेति॥ अतदृत्यस्याग विशेषणतया ऽदन्ताङ्गादित्यर्थः॥ स
र्वनाम्न इति तु विहितविशेषणं तस्य तु नांग विशेष्यभावृत्तौ मानाभावात्॥ तेनवर्णाश्र
मेतरामास पूर्वा इत्यत्र न॥ अतएव विभाषा जसीति चरितार्थम्॥ अंग संज्ञा निमित्तस्या
दन्तात्सर्वनाम्नो विहितस्येत्यर्थस्तु न तेषां रस्याघसिद्धेः॥ अत्र विधौ विषयसप्तमी तु न॥
तस्मिन्निति परिभाषा बाधे मानाभावात्॥ प्रागिति संज्ञाया इति॥ प्रत्ययादित्व ज्ञानाभावात्
ज्ञानाभाव इति भावः॥ परे तु अनुबंधयोग्यत यात्रापि तन्निषेध प्रवृत्त्या शित्वादेव सर्वादे
शः॥ इत्संज्ञायोग्य शकार बलमेव तेन तत्सूत्रेशितं॥ अत एव कार्यानां विषये नानुबंधत्वमसा

अतः परस्येस
येतु नदे पृष्ठाम
दे:

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ष्टो॰
९९

रूप्यमिति विकल्पाभावः ॥ अन्यथाकारादीनां कादेर्वाक्यार्थबोधोत्तरं प्रत्ययलक्षणेनेत्संज्ञा
देः प्रवृत्तावाक्यार्थबोधरूपतत्प्रवृत्तिकालेऽनुबंधलक्षणाभावेन विकल्पोद्भवः ॥ पश्चादनु
बंधलक्षणेनापि नात निवृत्त्युपयोगात्पादितत्र पश्चात्तज्ज्ञानेन तन्निवृत्तिस्तर्ह्येवापि पश्चात्तल्लक्षणेन
सर्वादेशस्यापि निवृत्त्यापत्तिः ॥ ध्वनितं चेदं लुटः प्रथमस्य अनेकाल्शिदिसादिसूत्रेषु भा
ष्येऽस्याह ॥ अतः सर्वनाम्न इति ॥ अदंतादंगात्परस्य सर्वनाम्नो विहितस्येत्यर्थः ॥ तेन मोसप्र
वार्येत्यत्र स्मेन ॥ ङसिङ्योः ॥ स्मात्स्मिनोर्हलंत्यमिति न न विभक्ताविति निषेधात् ॥ यद्यपि
लप्रवृत्तिकाले —— न विभक्तित्वज्ञानं तथापि न विभक्ताविति स्यस्य विभक्तित्वसयोग्यत्वस्यर्था
ऽन्दोषः ॥ अत एव न विभक्ताविति सूत्रे तद्ग्रहणं चरितार्थम् ॥ आमि सर्व ॥ आज्जसेरसुगित्यत
आदिति वर्तते ॥ पंचत्रिंशादिति ॥ तेन सर्वार्थप्रतिपादकत्वेपि स्वस्वलादिशाह्वानेनेति भावः
सर्वविभक्तौ बुद्धिस्थानेकसंख्याकावयवावरुद्धसमुदायशक्तौ तस्य समुदायस्यानुद्भूतावयवभेद

राम
९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेएकवचनंयथासर्वोलोकइति॥ताहकसमुदायद्वयादिविवक्षायांद्विवचनादिसर्वौव्यूहौस
र्वेव्यूहाइति॥यदाप्युद्भूतावयवभेदसमुदायविवक्षातदापिबहुवचनंसर्वेघटाइति॥पूर्वपराव
रव्यवस्था।संज्ञावर्तिनेएवेमेसर्वादयइत्यर्थः॥एवमुत्तरसूत्रद्वयेपि।नित्यंद्विवचनांतइति।
द्विवचनांतएवेत्यर्थः॥अकनर्थइति॥ननुकाकचोः कोविशेषः।प्रत्ययस्वराचित्स्वराभ्यांअंतोदा
त्तत्वस्यैवसत्वात्॥नचसुबंतान्नद्धितोत्पत्त्याचित्प्रयुक्तमंतोदात्तत्वमुभकाभ्यांइत्यादौसुबंतस्य
केलुप्रवृत्तेरितिविशेषइतिवाच्यम्॥तद्धितविधौप्राति पदिकादित्यधिकारेणप्रातिपदिकस्यै
वप्रवृत्तिलाभात्॥सचजायमानोन्यायात्सुबंतात्परंस्यान्यत्॥युष्मदस्मद्विषयेनुवचनात्सुबंत
स्यैवप्रवृत्तिलाभस्यैवदेः प्रागकजितिबोध्यम्॥नचाकचितन्मध्यपतितन्यायेनतस्योभयग्रहणेन
२ ग्रहणेउभकावेयवोयस्येत्यर्थेउभकशब्दादयप्युभयकइतिरूपकेनुनेतिविशेषः॥कश्चेदानींकाक
चोर्विशेषइतिभाष्यप्रामाण्येनतेषामनभिधानादितिशंकते॥नचेति।द्विवचनपरत्वाभावेनेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰शे॰
१००

न

अकच्चिन्माध्यपतितन्यायेनोभयशब्दस्य द्विवचनपरत्वं केतु तेन व्यवधानान्न तस्य तत्त्वमित्यर्थः ॥ उभा
दुदात्त इति सूत्रे भाष्यकृता ऽयचः प्रत्ययान्तरत्वेन व्याख्यानान्महाविभाषासंबंधस्यानुद्यत्वे न नि
त्यग्रहणमयोग्यसयोगविभागेनोभयशब्दाद्वृत्तिविषये ऽयतस्वार्थिका ऽयजू विधानार्थम् ॥ अयं
च तद्विषये पूर्वमेव सुबुत्पत्तेः स्वार्थिकत्वे नान्तरङ्गत्वात् ॥ अत एवायज्विशिष्टस्योभयस्य सर्व
नामता तत्सर्वनाम प्रकृतिकत्वस्य सम्पाद्यं तस्मिन् लाघुत्वस्ति ॥ अत्र नित्यशब्दस्य व्याख्या
र्थविरोधान्महाविभाषाया असंबंधः ॥ अयमप्यायुदात्त एव उदात्तग्रहणानुवृत्तेः ॥ अयं
भयशब्द स्य च वार्त्तिकप्रामाण्यादयचो भशब्दस्यो वा द्विवचनविषयस्याभावसंभावनात् नैव ॥ अत ए
वोभयो वास्य इत्यादौ अयवासेस्यल्लुकि नायचुत्तस्थ नयन वार्त्तिकमाह ॥ उभयोन्यत्रेति ॥
द्विवचनपरत्वाभावे इति ॥ तस्य सत्त्वविषयाभावेत्यर्थः ॥ उभयो मणि रित्यादौ तु न ॥ लिङ्ग
भ्यासस्योभयेषामिति निर्देशेन योगविभागस्येष्टसिध्यर्थत्वेन च तस्य क्वचिदप्रवृत्तेः

ग॰प॰
१००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

205

उ

अतो रूपाद्यंते नायच्‌रूपादेरस्मादनभिधानमेव वा ॥ अयच्यकच्‌ न वाच्यः ॥ उपजीव्यत्वेन
धकस्यैव प्राप्तेः ॥ अपवादस्त्वन्यत्र चरितार्थः ॥ अचैवं चिंत्यम् ॥ अकृज्विधावेवोभग्रहणेन सि
द्धे संज्ञाप्रणयनं किमर्थम् ॥ अनभिव्यक्तपदार्थकत्वात् संज्ञाव्यावृत्तिः ॥ सर्वनामसाहच
र्याच्च ॥ अतएवोपसर्जनव्यावृत्तिरिति ॥ उभयोन्यत्रेति वार्तिके तयप्समानार्थकोव्यय
च्‌ गृह्यते ॥ उभयोमणिः ॥ उभये देवमनुष्या इति भाष्ये तदुदाहरणात् ॥ स्वार्थिकस्य च ग्रह
ताम् ॥ तदुपक्रमेण वार्तिकप्रवृत्तेः ॥ एवं चावयवद्वयपारद्धमणिद्वयविवक्षयोद्भूतावयवभे
दविवक्षया वा द्विवचनमसाध्वेव ॥ एतन्मूलकमेवोभयस्यासार्वविभक्तिकत्वं तत्राति
सत्रे कैयटेनोक्तं तदाह ॥ कैयट इति ॥ हरदत्तेन इति ॥ अत्रारुचिबीजं तु प्रागुक्तभाष्यविरोधः ॥
भाष्ये तु उभशब्दपाठः प्रत्याख्यातः ॥ कप्रत्ययस्याज्ञाताद्यर्थविशिष्टस्वार्थे विधानेन द्विसस
ख्याप्रकारकसंख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूपद्विवचनत्वेन वार्तिके द्विव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०शे०
१०१

भनतस्य विग्रहणमुभयशब्दस्य ग्रहणवत् ॥ अतएव उभयोः उभौ उभौ भावि सादौ नायमु ॥ तदु
क्तं भाष्ये कैय्यटेन च न द्विवचनपरो भविष्यति ॥ कथं स्वार्थिकाः प्रत्ययाः प्रकृतितो ऽवि
शिष्टा भवन्तीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवतीति इति हेतोः प्रकृतेः कादिप्र
कृतेरुभशब्दस्य ग्राहकेण द्विवचनशब्देन स्वार्थिकस्यापि ग्रहणमिति तदर्थः ॥ त्रतसिलादिवि
भक्त्यन्तस्य स्वार्थे विहितो इति तत्तत्कारकशक्तिप्रधानावेवेति न तयोरुक्तं द्विवचनत्वमिति ॥
तस्मात् ॥ उभयशब्दात् ॥ जसीति ॥ अवयवद्वयारब्धसमुदायबहुत्वविवक्षायामित्यर्थः ॥ अंत
रंगत्वादिति ॥ सर्वार्थबोधकत्वस्वरूपार्थस्योभयत्वापि निमित्तत्वेन न तत्कृतं निःसंख्याया बहिरंग
त्वं ॥ अतएव सल्लोपसर्जनेन प्रथमोद्दिष्टत्वेन विकल्पः ॥ अर्थकृतबहिरंगत्वानाश्रयणाच्चेति भावः
ह्रस्ववाचामनुरोधेन ॥ परेतु भस्यपक्षे ऽभावबोधकतया निषेधाच्च बलीयांस इत्यनेनास्य प्रा
प्तिः ॥ किंच नांतरंगं बलीय इत्यस्या अत्र विषयो युगपत्प्राप्त्यभावात् ॥ संज्ञानां बाध्यबाधकभा

राम
१०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभावेन प्रातिपदिकसंज्ञासमकालमेव सर्वनामसंज्ञा प्रवृत्तेः॥ अत एवोभयेत्यत्र सर्वनाम्नो विहि- २
तत्वेन ङीभावसिद्धिः॥ पूर्वपरेत्यादितुपक्षे तदभावमात्रबोधकं॥ असिद्धं बहिरंगमित्यपि न॥ अं-
तरंगोनंतरं बहिरंगप्राप्तेः॥ अंतरंगे कर्त्तव्ये बहिरंगासिद्धत्वेपि तत्प्रवृत्त्युनंतरं बहिरंगप्रवृत्तेरनपावार-
यितुमशक्यत्वात्॥ बहुशस्तथादृष्टत्वात्॥ नदुत्तरमप्येतत्प्रवृत्त्या पूर्वादिष्विव पक्षे तदभावविशिष्टत्वा-
भुत्वबोधनस्याशक्यत्वात्॥ जसीति विषयसप्तमीति पक्षेपि प्रातिपदिकादिसंज्ञोत्तरमेवास्याः प्रवृ-
त्तिस्तदुत्तरमेव तद्विषयात्॥ स्थानिवदतिदेशप्रापिता यानिरवकाशत्वाच्च॥ प्रत्यक्षस्य स्थानिवद्भा-
वस्यानुमानिकत्वात् यानबाधायोगाच्च॥ सर्वनामसंज्ञा यामुक्तयुक्त्या यथोद्देशपक्षस्यैव औचित्या-
त्॥ अत एव तत्पादेशेऽभयप्रतिषेधः॥ तयपो ग्रहणे न ग्रहणाज्जसि विभाषा प्राप्नोतीति स्थानिव-
त्सूत्रस्थवार्तिकमयच्प्रत्ययांतरमिति सूत्राशयप्रदर्शनेन भाष्ये प्रसारव्याते॥ न चांतरंगन्याय-
बलेन॥ उभयीत्यत्र ङीपृतुरिट्कृतिसूत्रे मात्रशब्दादारभ्य अयचः चकारात् प्रत्याहाराश्रयणेन सिद्धेः

न यथा तत्रमयुत्वादेशो ऽभयेत्यादावयवादेशस्य स्थानिवद्भावप्रतिषेधः॥ १२१०

नन्वेवमपि ङ्नेङःस्येवस्यापि समुदा-
यानुबंधत्वेन कथं त्विकार्यमिति वाच्यं
तथत्वमिपामिति ह्यापके न तत्र तथात्वे
प्यत्र मानाभावादिति स्पष्टंतीऽतः रमि

१०५
६८-३१०

208

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०द्यो०
१०२

मतुरसनुवृत्ता चकृती स्यादेनाप्रसंगः॥ नयपूगग्रहणं तु सूत्रे अवयुसानुवादः॥ द्वित्रिशब्दप्रकृतिका
यजतस्य जसः शी विषये ऽ नभिधानमेव॥ पुंस्येव वा नाभिधानमिति तदाशयुरिति वदंति॥ तथापी
हेति॥ प्रत्यय ग्रहणे तदंत ग्रहणमिति प्रयोजनं सर्वनामाव्ययसंज्ञाणामिति च तदंतविधिरूपेन
उतरां तां नेत्याद्यर्थे परमकरतस्य व्यपदेशिवद्भावेन कृतरस्य च संज्ञा सिद्धेरिति भावः॥ तत्र मानमा
ह॥ केवलयोरिति॥ प्रयोजनाभावादिति॥ फलाभावादित्यर्थः॥ अदंतादंगात्परस्य सर्वनाम्नो
विहितस्यैव जसः शी स्यादेरर्थादिति भावः॥ ननु उतरग्रहणेनैव सिद्धे ऽ न्यतरशब्दपाठो व्यर्थो ऽ
त आह॥ अन्यतरेति॥ किंयत्तदाम् एव तयोर्विधानादिति भावः॥ अपुरीति॥ पूःशब्दस्य विशेष्यत्वे नरथस्येति
नेत्यर्थः॥ तस्य नयन्तु स्त्रियामुदाहरति॥ अंतरायामिति॥ एकोन्यार्थे प्रधाने च प्रथमे केवले
तथा॥ साधारणे समानेल्पे संख्यायां च प्रयुज्यते इति केचित्॥ केवले ऽ सहाये॥ तत्र संख्या
न्यार्थाऽसहायवाचीष्वंगानां षट्ब हृषु बहुवचनमेकादिकं निश्चेति सूत्रेषु भाष्ये स्पष्टमुक्तं॥

तप
१०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संख्यावाचिन एवार्थ
एकोगोत्रे इति सूत्रशेखरभाष्ये प्रथमार्थोप्युक्तः॥ साधारणसमानार्थयोः संख्यावाचिन एवार्थ
एकोगोत्रे इति सूत्र शेखरभाष्ये प्रथमार्थोप्युक्तः ॥ साधारणसमानार्थयोः सर्वस्य द्वे इति सूत्रे एकशब्द इति भा
तः पर्यवसानं यथा तेनैकदिक् चैत्रमैत्रयोरेका माता साद्यो। सर्वस्य द्वे इति सूत्रे एकशब्द इति भा
व्यमुपादाय केचिदाहुरन्यार्थोप्येकशब्दोस्तीति वदता कैयटेन केचिदित्युक्तेः तदर्थकाभावो
ध्वनित एव॥ एवं च प्रधानार्थेन हृदंमानं॥ स्वाभिधेयापेक्षावधीति समस्त पाठः नियमे
नावधिसापेक्षेर्थे वर्तमान पूर्वादीनामित्यर्थः॥ दक्षिणा गाथका इति॥ उत्कर्षावधिसापेक्ष स्व
त्वादत्र व्यवस्था स्तीत्याग्रहे नु उत्तरे च शास्त्र इति प्रत्युदाहरणं बोध्यं॥ उत्तराः कुरव इति॥
सुमेर्ववधिकपरदेशात्मरूपोपाधिविशिष्टकुरुषूत्तर शब्दः शब्द प्रवृत्तिनिमित्तत्वेन वर्तत इति
व्यवस्थाविषयत्वं बोध्यं॥ दिक्वाचक पूर्वादिशब्दानां मध्याह्न सूर्यसंयोगिदेशावधिकोदयास्ता
चलसंनिहितदेशतत्कालिक सूर्यसन्मुखयावद्देशतत्कालिकतत्पृष्ठस्थयावद्देशरूपोपाधि
विशिष्टदिशितत्तच्छब्द प्रवृत्तिनिमित्तत्वेन प्रवृत्तिरित्युपाध्यंतर्गततपाव्यवस्थास्त्येव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्याह्ने सूर्यस्योदङ्मुखत्वात्॥ देशवृत्तीनां तत्तदवधिकोदयाचलसंनिहितत्वादिप्रवृत्ति
निमित्तभिन्नमन्यत्र विस्तरः॥ अंतरमवकाशावधिपरिधानांतर्धिभेदतादर्थ्ये॥ छिद्रसामी
प्यविनावहिरवसरमध्यांतरात्मनि चेति कोशोक्तार्थांतरव्युदासार्थमाह॥ अंतरं बहिर्यो
गइति॥ अयं पत्रिसूत्र्यां क्रियमाणः संज्ञाविकल्पो न साधारेऽव्ययीभाव एव न तु बहुव्रीह्याद्युदात्तत्वा
दाविति बोध्यं॥ न बहुव्रीहौ॥ चिकीर्षितस्येत्यध्याहारलभ्यं॥ प्राचीनवृत्तिकृतुरीयेदं व्याख्या
नं॥ नेदं सूत्रं बहुव्रीहेस्तत्संज्ञानिषेधार्थं॥ उपसर्जनप्रतिषेधेन सिद्धेः॥ प्रक्रियावाक्येति॥ अलौकि २
केत्यर्थः॥ न चालौकिके समाससप्रवृत्त्या एकार्थीभावस्यापि तत्र कल्पनात् उपसर्जनत्वादेव
समासस्य तत्रापि निषेधः सिद्ध इति वाच्यं॥ तत्रैकार्थीभावस्यारोपेपि स्वार्थविशिष्टार्थांत
रबोधकत्वरूपोपसर्जनत्वाभावेनातिमवकानित्यत्रेव प्राप्तस्याकचोऽभावार्थं संज्ञानिषेधस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तात्पर्यात्॥ लौकिके तु नास्य प्रवृत्तिः तत्र समासस्य चिकीर्षितस्याभानात्॥ अतिङंतस्यादि न
नापूर्वोक्तस्य लौकिकवाक्यस्य समासस्य च दृष्टांतद्वयमुच्यते॥ अवृत्तव्यूहपरिभाषात्तु नास्येव
तिभावः॥ भाष्यकाररीत्येति॥ अकचूस्वरौ तु कर्तव्यौ प्रत्यंगं मुक्तसंशयमिति भाष्योक्तेर्वृत्तिवृ
द्धौ स्येदं व्याख्यानमयुक्तमिति भावः॥ ननु स्मृतिद्वयप्रामाण्याद्विकल्पोऽस्तु॥ कथं प्रत्याख्यान
मत आह॥ यथोत्तरमिति॥ एतच्च विधिन्विकल्पव्यारचेति सूत्रे भाष्ये ध्वनितम्॥ एवं च वृत्तिंद्रक्तार्थक पू
न नेदं॥ तद्गुपसर्जनप्रतिषेधानुवादकं॥ पद्॥ वार्तिककृतोतस्यकृतत्वात्सूत्रकृतेदमारब्धं॥ संज्ञा
याअन्वर्थत्वमपि भाष्यवृद्गृहितमेव न तु सूत्रवृद्गृहितमिति विभाषादिगिति सूत्रे कैयटे स्पष्टं॥ सू
त्रे सप्तमीनिर्देशः प्रथमार्थ एव॥ अत एव वृत्तिवृद्गृहितः प्रक्रियावाक्ये निषेधदस्यर्थो भाष्यकृता
बहुव्रीहिपदस्य तदर्थवाक्यस्थपदलक्षणया साधितः॥ अन्यथा मूलोक्तरीत्या सिद्धेनाद्वा
लक्षणाप्रयासो व्यर्थस्यादिति तत्त्वं॥ तदनुगुणानामिति॥ प्राधान्येनोपस्थितिविषयप्र

212

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰त्री॰
१०५

सिद्धस्त्वीयसर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवत्वेन बोधनं महासंज्ञयाऽसर्वार्थोपस्था
पकसर्वादीनामनुकरणाविशेष्यत्वेनेतरेषामनुकरणे मानाभावः॥ नामपदत्वारस्येन प्राधान्येने सर्वार्थेति वक्तव्य
त्यस्यलाभः॥ उपसर्जनं हीतरविशेषणत्वेनैवोपस्थापकमिति तेन तन्नव्यावृत्तिः॥ पूर्वादिसंग्र
हाय स्त्रीयसर्वार्थेति॥ संज्ञाव्यावृत्तयेऽभिव्यक्तेति न्यायमूलकं प्रसिद्धेतीति भावः॥ सर्वादिसू
त्रस्य चायमर्थः॥ सर्वादीनि तदन्तानि चोक्तसर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवन्ति
॥ तत्र प्राप्ताप्राप्तविवेकन्यायेन सर्वनामपदवत्त्वांश एव विधिः॥ सर्वार्थवाचकत्वस्य लोकत
२ ११५ भा ०९ एव सिद्धेः॥ एतेनान्वर्थसंज्ञोपस्थितसर्वार्थवाचकस्य विशेष्यतया सर्वादीनां सस्यतद्विशेष
णत्वानन्दतविधिरित्यपास्तं॥ एकपदोपस्थाप्ययोरर्थयोः परस्परमुद्देश्यविधेयभावेनान्वयस्या
व्युत्पन्नत्वात्॥ रूढ्यर्थयोगार्थयोरन्यतरविभागे नान्यत्रान्वयाऽयोगाच्च॥ तदन्ते सर्वार्थवाच
कत्वं तयैवेव द्वारा बोध्यं॥ एतेन तदाक्षिप्तस्य विशेष्यतेत्यपास्तं॥ तद्विनानुपपत्त्यभावेनाक्षेपा

राम
१०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राय:

योगादाक्षिप्तस्य शाब्दे ऽन्वये मानाभावाच्च ॥ केचित्तु भावप्रधानकस्योद्देश्यता ऽपरस्य विधेयतेति
वदंति ॥ परत्वाद्दीर्घः पक्षे रतो लघुरिति नोध्यम् ॥ सान्निवेशात् इति ॥ तदनुमानादित्यर्थः ॥ अत्रोपस
र्जनत्वमितरविशेषणत्वेनार्थोपस्थापकत्वं ॥ तदोसः सावितिसूत्रे ऽदसएवदस्य सत्वं नान्यस्येति
नियमे द्वीयतेरप्रत्यये द्वरिति प्राप्नोति ॥ स्वरितिचेष्यते यथालक्षणमप्रयुक्ते इति भाष्यं तु प्रकृतसू
त्रनञ्सूत्रस्थादि अनेकभाष्याविरोधादेकदेश्युक्तिरिति न तद्विरोधः ॥ तृतीयासमासे ॥ द्वंद्वे चेति
सूत्रस्थाकरोक्तरीत्या न बहुव्रीहाविति सूत्रस्थाकरोक्तरीत्या च प्रथमार्थे सप्तमी अयमपि समास
स्यैव निषेधो नावयवानां ॥ समुदायस्येति ॥ अकच्स्वरौ तु कर्तव्यौ प्रत्यंगं मुक्तसंशयमिति भा
ष्योक्तस्या प्रकरणस्थत्वात् एतत्प्रकरणस्थसप्तमीनिर्देशानां प्रथमार्थकत्वमिति तेस्यावयवत्वसं
ज्ञानिषेधकत्वाभाव उचितः ॥ किंच अवयवमात्रस्य निषेधे वर्णाश्रमेतराणामित्यत्र सर्वार्थवा
चकसर्वाद्यंतत्वेन समुदायसंज्ञायां सुरापत्तिः तस्य संज्ञानिषेधेपि सर्वार्थवाचकसर्वादित्वानपा

विक्रि ष यिच्यि:

ष्येति पाठः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
२०५

पातू॥ व्यपदेशिवद्भावेन समुदायस्य अवयवस्य च द्वंद्वे विद्यमानत्वे न निषेधेनु अवयवस्य निषेधे
फलाभावः॥ न च सत्शब्दस्य तां तत्वेवाक चोविशेषेणाफले॥ द्वंद्वावयवमात्रे सुदरादिविशेष ये
णान्वयाभाववत् कृत्सादिविवक्षाया अभावात्॥ समुदायेतद्विवक्षायां समुदायोत्तरप्रत्ययेना ने॰
वयवगतकुत्सादेरपि बोधे नोक्तार्थत्वादवयवेभ्यः पृथक्तदनुपत्ते ॥ अन्यथा तत्प्रत्येकं प्रस
योप्रसापत्तिः॥ अतएवोक्तं भाष्ये ऽकज्ञिन भवति इति विभाषा जसीति सूत्रे समुदाये कुत्साविव
वक्षायामिति तदर्थः॥ वृत्तावृत्या समासस्तु भवत्येव॥ तत्र सर्वाद्यंतत्वादनेन विकल्पो भवत्ये
व॥ त्वदधरमधुरमधूनि पिबंत मिति जयदेवप्रयोगबले नान्यार्थत्वछद्वस्य सत्वेपि तस्य सर्व
नामत्वेमानाभावाच्चैवकृसमतत्वाच्च॥ एतेनन बहुव्रीहाविति वदस्यापि द्वंद्वे चिकीर्षितत्वम पा
स्तं॥ फलाभावात्॥ जसाधारेशीभाव एवति कृत्स्ने विधायकस्य विभाषा जसीति स्या संगतत्वे
श्चेति भावः॥ उक्तावयवमेदसमूहस्य द्वंद्वे विशेष्यतयोपसर्जनत्वेन संज्ञायाअप्राप्त्या द्वंद्वे चे

राम
२०५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्यपि न बहुव्रीहाविति वदितितव्यं ॥ अत एव गोस्त्रियोरिति सूत्रे कृकरमैयौ विसारौ हस्ववा यु
रणाय द्वंद्वे नेति वचनमारब्धमिति दिक् ॥ नाकमिति ॥ समुदाय निष्ठकुत्सा बोधको ऽकज्
नेरर्थः ॥ प्रथमचरम ॥ अत्र सूत्रे नेति न सबध्यते ॥ प्रथमादिषु संभवात् ॥ जसीत्यनुवृ
त्तेरर्थाधिकारादयमपि शीभाव एव विकल्प्यत इत्याह ॥ जसः कार्यं प्रतीति ॥ तयः संख्या
वयवेनयविति ॥ तदंता इत्यत्र हेतुरुक्तः ॥ द्वितीयतृतीयो द्वितीयः त्रेः संप्रसारणं चेति
साधू ॥ अर्धवदिति ॥ प्रतिपदोक्तस्येत्यपि बोध्यते तेन तदंते आयुरान्तस्य द्वितीयाय भागाय
अ त्येवा नभावे सो भवस्येव जस या ॥ अष्टनहस्य तो विभक्ताविति भिंचिररूपतो चीसनुव मि
र्तते तदादिविधिश्चेत्याह ॥ अजादाविति ॥ जरसा विसादो नव्यपदेशिवद्भावेन ॥ विभक्तौ
किं ॥ जरा पादरदमु जारमु ॥ प्रतिपत्तिलाघवाय जरायाः असुङ् कृतः ॥ पदांगाधिकारे इति
पदमंगं च विशेष्यो विशेषणेन तदंतविधिरिति भावः ॥ पदशब्देनोत्तरपदाधिकारः केवल

आ चक्षाण णिजं तेतु न फलं अभि व्यक्तेति नादोषः ॥ इति केचित्
कौ लुप्तमित्यस्पाससर्वांत्रे न त्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
१०९

णसाधिकारस्थागृह्यतेइति येन विधिरिति सूत्राकरे स्पष्टं॥ निर्दिश्यमानस्येति॥ षष्ठीस्थानेयोगे
तिसूत्रमावर्त्तते॥ आवृत्तस्यायमर्थः॥ षष्ठ्यंतमुच्चार्यमाणमेव स्थानेन युज्यते न प्रतीयमा
नमिति॥ तेनेदं सिद्धमिति भावः॥ नन्वयं जरशब्दो न जराशब्दो ऽत आह॥ एकदेशेति॥ स्था
निवत्सूत्रेणेति भावः॥ जरायाऽसत्त्वे परिमाणस्याग्रहात्॥ अनेन स्थानिबुध्यैव कार्यप्र
वृत्त्या निर्दिश्यमानस्येति परिभाषया बाधाभावो बोध्यः॥ येन विधिस्तदंतस्येत्यस्य तु संज्ञा
सूत्रत्वात् सूत्रस्थजराशब्दो जराशब्दांतपर इति तदंते आदेशो प्रवृत्तौ परिभाषाविरोधः स्पष्ट
एवेति दिक्॥ निर्जरसेति॥ अत्र स्थादिक्षिति पदत्वेन रुत्वं न॥ भसेन पदत्वबाधात्॥ सूत्रेषु
उत्तरस्थस्य पूर्वत्रापवर्षवत् अग्नेर्लेखो वैचित्र्यायेति बोध्यं॥ पक्षे इति॥ जरसादेशाभा
वपक्षे इति भावः॥ रमवर्णानामनुरोधेन॥ परेतु विभक्त्यादेशेभ्यः परत्वाज्जरसित्यसंगतं॥

स्वादिष्वसर्वनामस्थाने यचि भमित्यनयो र्लेखस्यौचित्यसारग्नेरतः इत्येतत्सूत्रे

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिभक्तयादेशानामेव पूर्वविप्रतिषेधेनेष्टत्वात्॥ अत एव जरायाः इति सूत्रे अजरांसीत्यत्र नपुंसकत्वात् जरसोः प्राप्तयोर्विप्रतिषेधेन जरसि इति भाष्योक्तं संगच्छते॥ अन्यथा तेट्टी स्याद्भावात् पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनाम स्थानत्वाभावात् नुमा विप्रतिषेध विचारासंगतिः स्पष्टैव॥ अत एव राङ्सीति सूत्रे कैयटे नोक्तम्॥ भाष्यकारः सन्निपात परिभाषया जरसादेशमनभ्युपगच्छन्ति जरेण अतिजरा इति भाष्ये न तु अतिजरसिना अतिजरसादिति इति गौरव मुद्भावितवानिति॥ भवद्रीत्या पूर्व जरसादेशो इनाद्यप्राप्त्या तद्भाव पक्षे च तस्याप्राप्त्या सन्निपात परिभाषया जरसादेशमनभ्युपगच्छन्ति तस्या संगतिः स्पष्टैव॥ एतेन कोप्याह॥ अतिजरसिन अतिजरसादिति केचिदिच्छन्ति॥ प्रधानभाष्ये तथानुनेतदिष्यते लक्ष्यन इति नपुंसकह्रिती पे कवचनेपिलुक् बाधेन अतो मित्य मि सन्निपात परिभाषया जरसभावः नचैतत्र नोक्तं तत् सन्निपात कृतएवानादिः किन्तु तदभावे पिएषानुसन्निपातलक्षणविधि

इनादेशो
एं

जरसादेशाभाव पक्षे इनादेशो न स्यात् इति भावः

न॰ श्री॰
१॰७

विना नयस्य प्रवृत्तियोग्यता तत्रैवेति अत्र भवत्येव जरसिति वाच्यं॥ मानाभावात्॥ टाङसीति
सूत्रस्थे नातिजरैस्तैस्तेन द्विषये वै पटेन विरोधात्॥ ध्वनितं चेदं जरसा पाद इति भाष्ये॥ त
त्रहि पूर्वपक्षिणा अतिजरसं पश्येत्यत्र लुक्स्यान्नेति पृष्टे परेण प्रथमैकवचनेप्यतिजर
संति छेनीत्यत्रापि कुतो लुङ्नाशावचते इति पृष्टे पूर्वपक्षिणा प्रथमैकवचने अमूभावो नर
मेव जरसन्तत्र जरसि कृते सन्निपातपरिभाषया नेलुक् इति विशेष उक्तः॥ पद्ल। अम्भावे त्र
तेसन्निपातपरिभाषया न जरसिति पाठभेदेन विशेष उक्तः॥ ननु परेण यद्येवं अतिजरस
मातिजरसैरित्यत्र न प्राप्नोति जरसिति द्वितीयैकवचनादौ आशंकिते सिद्धांतिना इष्टमेवैतत्
अतिजरैः अतिजरैरिति भवितव्यमिति॥ अत्र विशेषोपपादनेत्यपाठ एव युक्तः॥ अन्यथालु
कएकवचने तेनाभावे उपपादिते द्वितीयैकवचनेपि तेन न्यायेन लुक् कोशात्मो विशेषोक्तिः र
संगतेति बोध्यं॥ एवं स्त्रियां जरसारे इति कृते याङापरसादीनामाकारप्रश्लेषेणावारणं विफल

राम
१॰७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेव॥ तेषां परत्वात्॥ अतिखट्वशब्दे तेषां वारणाय तु प्रश्लेष आवश्यक इत्याहुः॥ परे तु जरसादेशा
न्विभक्तिसंबधिकार्यमात्रे पूर्वविप्रतिषेधेन॥ तेन जरसामित्यादावपि पूर्वं नुडि जरसो भाव
एव॥ एवं च कृत्स्नेन याप इत्यत्राकारप्रश्लेषे नपुंसकेनापि मानं॥ अत एव ङ्यापो ग्रहणेऽदीर्घ इ
तिच जरसादेशस्य स्थानिवत्प्रतिषेधो वार्तिककृता नारभ्य इत्याहुः॥ परिभाषाया अनित्य
त्वमिति॥ इनातो रिकारदीर्घोच्चारणं तत्सिकर्तव्ये एतस्य करणं च तदनित्यत्वे मूलमिति तदभिमा
नः॥ षष्ठ्येकवचन इति॥ एकसंज्ञोपात्तत्वात् स्यादेशविषयेऽपि पूर्वविप्रतिषेध इति तद्भावः॥ एत
त्रभाष्येति॥ इनातो रिकारदीर्घोच्चारणप्रत्याख्यानपरभाष्यस्यार्थः॥ इष्टमेवैतत्संगृहीतम
लिज्जरे रितिभावितव्यमिति जरायाः इति सूत्रस्थभाष्येति चार्थस्यान्यत्र विस्तरः॥ पद्दन्नोमास्।
भादेशैः स्थानानुरूपाः स्थानिन आक्षिप्यन्त इत्याहुः॥ पाददन्तेति॥ अनुदात्तस्य चर्दुपधस्ये त्यतोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल० शे०
१०८

न्यतरस्यामित्यनुवर्त्तते।।अत एव तुल्यास्यसूत्रादिभाष्येऽस्येतुल्यःपादेनोपहृतेमासेनपूर्वी
येत्यादिप्रयोगाः हृदयस्य प्रिय इति सौत्रप्रयोगश्चोपपन्नो भवति।। ये च तद्धिते इति सूत्र
स्थे वा केशेषु इति वार्त्तिके वाग्रहणं तु तत्र सूत्रे वाग्रहणसंबंधबोधकं।। यद्यपि निशाशब्दस्य नि ण
शशब्दप्रकृतिकत्वेन भागुरिमत सिद्धतया टापो वैकल्पिकत्वेन नचवाक्वाचेत्युभयवत्वं नि
शानिशयोः सूत्रे निशाग्रहणं विनापि सिद्धिस्तथापि स्मृति हलंतस्यासाधुत्वबोधनाय ग्र
हणमिति वृत्त्यनुसारिणः।।परे तु अनुदात्तस्येति सूत्रेऽन्यतरस्यामित्यस्य स्वरितत्वं नास्ति
अत एव शीर्षश्छंदसीति सूत्रे शीर्षन्निति प्रकृत्यंतरं दृष्टव्यं।।आदेशत्वे हि छंदसि शिरःशब्द
प्रयोगो न स्यादित्युक्तं भाष्ये।।अन्यथा विकल्पानुवृत्त्यादेशत्वेपि दोषाभावेन तदसंगतिः स्प
ष्टैव।।ये च तद्धित इत्यत्र चादेशतायां शिरसो ग्रहणं कर्त्तव्यमित्युक्तं।।वा केशेषु इति च वक्तव्यमित्युक्तं।।

स्मात् मात्रोरि
तिवत् प्रयोगः
किं व्हिह्रस्या
दर्थभेदाः ... ५

राम
१०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्त्वासादि विषयात्तिप्रवृत्तंतरात्येपदादयः ॥ एवं मांसपृत्स्ववोपि ॥ अतएव नसपृतोः
स्छानिवद्भावादावतत्त्वमादायनसांपृतामिसोदोननुइादि ॥ नासिकायानसयतसक्षुद्रेषु
इतिवार्त्तिके आदेशत्वमेवं नासिकायाःस्युके ॥ अतएव तद्विषयेनासिकाक्षुद्र इत्यादिन ॥ अ
तएवपदादिषुमांसपृत्स्वनामुपसंख्यानमितिवार्त्तिके स्छानिनिर्देशोनवृत्तइत्याहुः ॥ प्रत्या
हारइति ॥ व्याख्यानादौ इष्ट कारेलो तिभावः ॥ अकृतीवस्येति ॥ पर्युदासपरतया व्यस्य भाष्ये
व्याख्यानात् लघुत्वाच्चेतिभावः ॥ प्रसज्यप्रतिषेधे न व्याख्याने ऽ तदेव ज्ञापकात्तेषां चित् अ
समर्थसमासानांसाधुत्वं बोध्यं ॥ स्वादिषु ॥ सुरत्वे प्रथमैकवचनं ॥ आदिग्रहणेनकृदंतानांग्र
तं व्याख्यानात्तदाह ॥ कृपप्रत्ययपावधीति ॥ तदंतेषु इत्यर्थः ॥ यचिभं ॥ समाहारद्वंद्वे स्रोत्रत्ता
न्नटच् ॥ पचीसनेनस्वादेर्विशेषणात् तदादिविधिः ॥ असर्वनामेति ॥ तेन सुपादाविसादौ पादः
पन्न ॥ भसंज्ञापदत्तकार्यप्रतिबंधरूपे ऽ शास्त्रीयेपि कार्यं भवति न पदांतसत्रस्छ भाष्यप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰शे॰
१०२

पाण्यात्॥ भा॰कडारा॥ प्राक्कडारादिति नावधिः तत्पुरुषो द्विगुश्चेति लिंगात् समावेशार्थं हि तदि
त्याह॥ कडाराः कर्मधारय इत्यादि॥ प्राप्त्यर्थं कार्य इत्यनाचार्यादिति वक्तुं युक्त॥ एकैवेति॥ संख्यावाच्येकशब्दो
पादानादवधारणं संपद्यत इति भावः॥ यापरेति॥ द्वयोः सावकाशयोः परान्निरवकाशस्तत्र
वेत्यर्थः प्राप्त्यामेव बाधसिद्धिरलुन॥ अन्यत्र तव्यदादौ कृत्त्यप्रत्ययसंज्ञादीनां समावेशदर्शनेन वि
रोधाभावाद्विप्रतिषेधाप्रवृत्तेः॥ लौकिकस्यतत्ककौंडिन्यन्यायस्यापि तत्नोक्तसंज्ञाविषयेऽदर्शने
नशास्त्रेऽपि संज्ञाविषये अप्रवृत्तेश्च॥ तेनेति॥ अनवकाशत्वेनेत्यर्थः॥ परोदाहरणत्वपादानमु
तराणि कारकाणि बाधन्ते इत्याधारेत्यपष्टं॥ विरोधाद्यभावेन विप्रातिषेधसूत्राद्यप्रवृत्तावपि
परत्वादेरन्यत्र बलवत्वेन दृष्टतयाऽत्रापि तेन व्यवस्था॥ अपादानादिसंज्ञानां समावेशे तु तत्त
त्संज्ञयोः पर्यायप्राप्तिर्दोषः॥ अपदसंज्ञयोः समावेशे तु राजदृषदादौ नलोपस्यापत्तिर्बोध्या॥ नचपरा
जन्यदृत्यादौ सुप्तिङन्तमिति पदत्वं दुर्वारम्॥ परयाभसंज्ञया लुनबाधः तस्या अन्तरंगत्वादिति

राम
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नार्थं ॥ समानानावधिकाया अंतरंगाया अप्यनया बाध्यत्सामान्यचिंतया अपवादत्वेनैव बाधादिसा
हः ॥ आकडारस्थसंज्ञासु च यथोद्देशपक्षएवेत्यदस्तु इत्यादौ निरूपयिष्यते ॥ अपदसंज्ञाविधावेग
प्रकरणे भस्येत्यस्य पाठे नागमित्यनुवर्त्य अंगसत्पदं भवति भमवतीत्यर्थेन ताभ्यां नस्याः समा
वेशएव न पर्याय इति बोध्यम् ॥ पुरुषसंज्ञा परस्मैपदसंज्ञयोरपि णलुत्तमो वेति ज्ञापकात्समावे
शः ॥ गुरुलघुसंज्ञे वर्णस्य नदीघिसंज्ञे तदंतस्येति भिन्नावधिकत्वात्समावेशः उभे अपि वर्तास्येति
पक्षआकरे उपलभ्यमानोप्येकदेशिन एव समावेशानुपपादनादिति दिक् ॥ यलोपइति ॥ हलिस
वैषामिसनेनेत्यर्थः ॥ अल्लोपोनः ॥ तपरकरण [illegible] ऋम् ॥ अनितेः छिपिआनइत्यादौ लोपाभा
वाय ॥ अनन्तस्तत्रएकदेशविकृतन्यायेनेत्यन्यत्र विस्तरः ॥ पूर्वस्मादिति ॥ अचः परस्मिन्नित्यत्रपू
र्वविधाविस्येत्यस्यावृत्त्या पंचमीसमासाश्रयणादयमर्थो लभ्यत इतिभावः ॥ तेनप्रसेषिवन्निसा
दिसिद्धिः ॥ अन्यथानुसस्यात् ॥ अतएवोभेअभ्यस्तमितिसूत्रे उभेग्रहणं यत्रोभेश्रूयेते तत्रैवाभ्य

ल॰शे॰
१०

स्त संज्ञार्थं मुते र्त्सनुरस्य च अभ्यस्त लक्षणलोन्नु समासूदिति उभे ज्ञापेका देशास्य पूर्वे विधावितिपं चमी
समासे न स्थानिवत्सो प्राप्ते रसाति प्रयोजनं उभे ग्रहणं सहार्थमिति तम्॥ तेन उभे पत्रे पूर्वे
ते इस्यर्थेपि प्रत्येषि षु निमित्ति सिद्धये आवश्यकेन प चमी समासे न तत् सिद्धं उभे ग्रहणं सहार्थ
मिति तद्भावः॥ इति पक्षे सिति॥ तुना ऽस्यानित्यत्वं सूचितम्॥ प्रविगणायेति भाष्योदाहरणमपि
एव तदनित्यत्वे एव संगच्छते॥ अतेरे गौरित्यत्र वृद्धेः स्थानिवत्त्वान्न संबुद्धिलोपः॥ पूर्वस्मान्निमित्तले
नाश्रितादिति व्याख्याने तु न मानम्॥ केचित्तु पूर्वस्माद व्यवहित परस्य कार्ये एव स्थानिवत्त्वं प्राचि
नाश्रितादिति व्याख्याने तु न मानम्॥ केचित्तु पूर्वस्मादव्यवहितपरस्य कार्ये एव स्थानिवत्त्वं प्रावि
गणापेसादौ तु स्थानिवद्भावलभ्याकारस्यैव व्यपदेशिवद्भावेन लघुपूर्वत्वमादायेति न दोषः॥ त
दनित्यत्वे च न मानमित्याहुः॥ पूर्वत्रासिद्धेनेति॥ अतिदेशा हस्याः त्रिपाद्याः असिद्धत्वेन न्यायसिद्ध
नुवादोयम्॥ तस्फलं तु ति देशानेरागांबेति घटितानां त्रिपाद्यां प्रवृत्तिबोधनम्॥ अत एवामी

लल निपतत्साराह। तस्फलं तिथि॥२
अथ परेणेनीत्यर्थः पूर्वसूत्रं तु लिंगात् न च प्रवर्त्तते एवरस्य न्यत्रस्य ४॥१२
नरघटितनिराससायाऽऽह वतीति॥२

राम
१०

परन्त्रिलम्य

अत्र स्तु प्रभृतिष्विति नान्येऽशस्प्रभृतिष्विस्युक्तयाः स्यात्वचिरेव प्रवृत्तिर्बोध्यते।७

भागे नेतत् सिद्धमिति प्राचो नित्यं स्वरपतिरिदमिति २ नलोप आरब्धमिति शेषः सञ्ज्ञासमतल्याह नलोपः३

षीरपेतेत्यादौ मीनत्वानुत्वसिद्धिः॥ अत्रैकारस्यादस्सं बधित्वं पेद्‌ध्यस्येदमानुतरपदत्वं वा तद्बाधी
नम्॥ तस्य दोष इति। इदं वाचनिकमेवानुमुनेरिति सूत्रेणेति योगविभागस्तु भाष्येन दृश्यते॥ अत ए
व सिद्धका उ वार्तिककृता आरब्धम्॥ नलोपः सुब्विति सूत्रं च सूत्रकृता॥ प्रकारार्थ इति॥ प्रका
रः सौहृद्यं तच्च सुप्स्विति न मांस्यचनीसोदावपि नलुमतेति निषेधानित्यत्वात् शसादिपरत्वं बोध्यम्।
शौहृत्वेन सादृश्यमिति यन्ये॥ तत्र॥ नाशो कृष्यमूरोगे षिस्य वैयर्थ्यापत्तेः॥ नासिकापायतस्य
क्षुद्रेषु नसि तिभाष्यपठितवार्तिकस्य च वैयर्थ्यापत्तेश्च॥ आसन्यं प्राणमूचुरित्यादावपि न दृढे
व शसादिपरत्वम्॥ अत एव पत्सु हृन्निशां ग्रहणं चरितार्थम्॥ तेषां द्विविधानामपि कोशसिद्धतया
तत्र व्यवस्थार्थतायापत्तव्यत्तया सुप्प्रत्ययमो प्रवृत्तौ तत्स्याः अस्मभवेन तद्वैयर्थ्यं सुस्पष्टमेव॥
प्रकारार्थत्वे प्रमाणमाह॥ भाष्य इति॥ तत्र हि शस्प्रभृतिष्वित्यन्नेऽशस्प्रभृतिष्वपि दृश्य
ते शलादौ षण्णीककुदाषण्णीयाचतेमहादेवस्येत्युक्तम्॥ आद्यस्याधिगुप्रैषपठ्यमानस्य अ

पादवदित्यर्थः१ व्यवस्थार्थः१

प्राचो नित्यं स्वेऽयति बाहुल्यमे ति ९

तत्रात तत्प्रवृत्तौ काचित्स्ता देव ८

निषेधानि त्यत्वादेव इ

त्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल.शे.
११

नाकाकारे दोषणीत्यर्थः॥ छान्दसः कादिलोपः॥ एतेन दोषइत्यस्याकारान्तस्यइत्युक्तावाचिनो
दोषन्नादेश इत्यपास्तम्॥ तेन पदंघ्रिरिति॥ नचकेशस्य पदादीनाम् पादादयीदेशेपादा
दिभ्यः पृथक्पदादिवचनेनं तत्र व्यर्थम्॥ नहि स्थान्यादेशयोः पृथगुपादाने प्रयोजनमस्ति
स्थान्युपादानेनैनतदर्थाभिधानस्य यथादेशस्याप्यर्थबोधनात्॥ अत एव न साध्यादेशा
नांक्रोशोऽनुपत्यास इतिवाच्यम्॥ पदादीनांभाष्यरीत्यानादेशत्वात्॥ नतेपितृन्त्वेनक्रोष्टु
रितिवत्व्यवस्थामस्यावश्यकत्वेन सोपरतोसृदादीनांप्रयोगार्थंप्रकारार्थस्यावे
इयकत्वात्॥ स्पष्टम्चेदम्वाशोकेतिसूत्रेमूले॥ कोशेशब्दा अर्थपरा एव॥ शक्तिग्रहस्तुप
दत्वहेतुकानुमानेन सामान्यत एव॥ एवं च विष्णुनारायणइत्यादौ विष्णुपदार्थाभिन्नोना
रायणपदार्थ इति क्रमेण बोध इत्यादि मञ्जूषायां नामार्थवादे विस्तरेण निरूपितम्॥ एतस्य
इममुक्त्वाचक मितिशक्तिग्रहस्तु स्वस्वप्रसिद्धिमादाय तत्तत्पुरुषस्यानियतः पश्चान्नमनसेव॥

रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अघ्येरे विसरस्त्वति शेकाव्येविहव्ये एतानि तेष्ये नामानी सादेयत्त एतानि तत्र नामानि भतस्तद्
भिन्नानामेषामर्था इति बोधः॥ अतएव नामत्रिते समानाधिकरण इति सूत्रे भाष्ये सामान्यवचने
मित्यस्येदमुदाहरणं दत्तम्॥ अन्यथैकार्थबोधकत्वरूपसामानाधिकरण्यस्याप्राप्तावा न
दसंगतिः स्पष्टैव॥ एकशेषस्तु न॥ तथा सति तत्तच्छब्दस्वरूपस्य सम्यक्बोधानापत्तेः॥ अनेक
शब्दानाम् स्वरूपबोधनपूर्वमेकार्थबोधने एकशेषस्यापातात्॥ अतएव पतन्देतेभ्य इत्यादौ पाणि
निनैकशेषो न कृतः॥ एतेन कोशशब्दानां शब्दपरता॥ अतएवैकशेषो न॥ अर्थपरत्वे तु न भवति सं
इतः पूर्वं शक्तिग्रहाभावात्॥ एते शब्दा एकार्था इति बोधः॥ एवं चात्र प्रकारतया भासमानेपि न
क्षतिरित्यपास्तमिति दिक्॥ संख्याविः॥ सायेभ्य इति वनव्ये पूर्वग्रहणमुत्तरपदस्याधिकृत
स्य षष्ठ्यंतत्सलाभाय॥ एतेन छात्र प्रिय इत्येवेतदुदाहरणमित्यपास्तम्॥ विश्वपा इति॥ वि
श्वं पातीति विग्रहे आतोनुपसर्गे इति प्राप्ते वासरूपन्यायेन आतो मनिन्तु क्वनिबु निप श्येति
चेन विच्॥ स चा दन्तेभ्यो लोके पि कीलालप आगतमिति विभाषा पूर्वोह्णे इति सूत्रे भाष्यप्रयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
११२

केचिदिति हलमवकाराद्दाक्विनिवा थामिसारंभ प्रख्या स्थानयोः समफल तापयावानस्याहो वक्तिपूर्वलपनवलङ्
स्थारस्वेनापिविनिजे बाक्षिवितु प्रसयफलसणस्य विध्यर्थमेना तत्तोडिस्वत्रे म्वहुनापी तस्यादित्यभिमानः अस्येति
भाष्यमतं प्रख्यफलस्मणस्य नियमार्थत्वे नातत्तोडित्यतत्तिस्यर्थं नाम्पसत्स्येति सत्रे ऽची नियोग विभागा गुणो यसत्ये विप

तक्विपरत्वादन्ते भ्यो भाष्यानुक्तक्विपृभ्योऽनभिधानमेव॥ अतएव पृथ्याख्याविसत्रे नुक्तो भाष्ये
ननुक्विपू॥ अतएव शास्त्राङ्गसादि प्रयोगेषु भाष्यकृता ईसमू नकृतमिति कैचित॥ अन्येक्विप
मेवाहुः॥ दीर्घोज्ञसिच॥ चेनेचीत्यनुकर्षदीर्घात् शास्येवेति नियमपरम् दीर्घोज्ञसीत्ये
वतु नसूत्रितम्॥ दीर्घादेवशासीति विपरीतनियमापत्तेः। प्रख्याहारेषु जातिपक्षाश्रयणाद्
त्रप्राप्तिः॥ न्याय्यसादिति॥ नसिपूर्वसवर्णे दीर्घनिषेधस्यन्याय्यतादित्यर्थः॥ धातोःक्वि
हाहानिति॥ अव्युत्पन्नं प्रातिपदिकमिदम्॥ अस्याङ्किपाशब्द त्वेसानिति प्रत्युदाहरणम्॥ प
रेतुक्षः श्वरत्वादिसिध्यर्थमातो नापरतिवक्तव्यमिसूत्रे आतइति योगविभागे नतत्संसाध्य
तत्प्रख्याख्यातम् भाष्ये॥ एवं चसाङ्गसादेर्यघभिधानम् तदायोगविभागेन लोपरुग्
एव सूत्रे धातुग्रहणमावंतनिवृत्त्यर्थमेव॥ भाष्यवार्त्तिककृतोरत्तानकल्पनापेक्षयेदशा
र्थकल्पनस्यैवौचित्यात्॥ आवंतादाचारक्विवेवन॥ तन्नक्विवंताद्वाकर्त्तरिक्विपनानभि
अतएवध्यायतेसंप्रसारणमितिवार्त्तिकेपीध्यायतेर्धानेवैति भाष्यं संगच्छते शास्त्रीरूपज्ञांवावेतिसूत्रस्थ
रूपोशारस्त्रचविजेब चेनक्विविति तत्सूत्रभाष्येक्विपू परेनसाहश्यात् क्विनेवोयनरीति चिंत्योयं केयरइतिपुमा
रूपेत्सत्रे घोनेरूपणम्

तेभावेनक्विपिततेपि नैलारितिभावः
यत्तुनत्तक्विप्यपीत्यंमवसेवसूत्रे
हलीत्यस्या नानादिपरत्वात्।

रम
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पानादिरिति न तत्र सूत्रवार्त्तिकयोर्विरोधः॥ अत एव प्रथमयोरिति सूत्रभाष्ये पररूपं बाध्यसामान्य
चिंतया दीर्घमात्रस्य बाधकमिति पक्षे रामानित्यादिसिद्ध्यर्थं प्रतोदीर्घ इति सुपि चेति यानु
वर्त्तमाने बहुवचने झल्येदिति सूत्रे बहुवचने इति योगविभागेन पररूपबाधकं दीर्घविधा
यं रामाणामित्यादावनेन दीर्घे परत्वात्कृते ऽग्नीनामित्यादौ सावकाशस्य नुटोऽप्राप्तिमाश
क्य ह्रस्वनद्यापः इति सूत्रे आज्जसेरित्युत आङ्ग्रहणानुवृत्त्या समाधाय कीलालपामित्यादौ नु
ड्विधायके आतो धातोरित्यनुवर्त्य लोपेन न नुड्बाधकेन समाहितम्॥ नुड्विधायके आङ्ग्रहणान
र्थक्यमिति तदाशयः। अधात्वेवपवाकारान्तानामलोपाभावे तु तदसंगतिः स्पष्टैवेति आहुः
ह्रः आः इति॥ क्त्वाप्रत्ययस्य ङित्त्वाद्यर्थकमूलकं ह्रदृश्नेः शास्येत्यमित्यादिप्रयोगस्य मन्त्रोदाहर
णम्॥ एतेनाचारक्विबन्तात् कर्तृक्विपैवैतेन प्रयोगा निर्वाह्या इत्यपास्तम्॥ आचारक्विबन्त
प्रभृतिक कर्तरि क्विपो भाष्ये क्वाप्यनुपन्यासेन तेभ्यः कर्तरि क्विपोऽनभिधानस्यैव स्पष्टमाभाष्ये॥
इत्यादन्ताः॥७॥

केचित्तु आङ्ग्रहणं नियमार्थं तथा हि एकादेशनिषेधान्नाकारान्ताशोरवं ताडवेति तेन
सामित्यत्र न अधात्वेवंप्रकारान्तानां तल्लोपे तु गमागामित्यत्रापि तन्नापत्तिः विहितविशेषणेन न दारुणात् कीलाला
लपानां कृतानामित्यत्र भाष्ये अकारणान्नयोस्सस्य वैयर्थ्यापत्तेः केचित्तु रामायणामित्यत्रालोलोपापत्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रन॰ शे॰
१९३

जसि च॥ ह्रस्वस्य गुण इति॥ ह्रस्वस्य॥ संबुद्धौ चेत्यतः संबुद्धाविति वर्त्तते॥ शेषो घ्यसखि॥ यू स्त्र्याख्या
विसतोपूर इति ङि- ति ह्रस्वश्चेत्यतो ह्रस्व इति च वर्त्तते शेषपदार्थे माहानदीसादि॥ तदंतमि
तिरनुवृत्ते युष्मां शेषपदार्थस्य विशेषणात्तदंतलाभ इति भावः ननु मसे इत्यत्रानवकाशासा
नदीसूत्रेव भाविष्यतीति शेषग्रहणं व्यर्थमत आह ह्रस्वेति॥ अधिकारादिति कृशाराः कृखे
धारयेत्तस्य पूर्वं तत्स्य बुद्धिस्थत्वादित्यर्थः॥ स्पष्टार्थमिति स्पष्टतया तदंतविधिलाभार्थमितिभा
वः॥ माऽत्रे इति॥ ङ्‌तोङि इति तु प्रहस्तनुवृत्तावेव तात्पर्यग्राहकमिति भावः॥ आङो ना॥ पुंसी
तितु नोक्तं॥ अमुना कुलेनेत्यत्र मुलेस्यासिद्धत्वान्नुम नापनोपुंस्त्वाभावेन नाभावस्याप्यनापनो
रूपासिद्धेः नमुने इति निषेधस्तु न नुमि नमुटादेश इति वा निर्दिष्टविरोधात्॥ अतएव सूत्रकृता त्वं तीति
चतूनीति नोक्तं॥ तथा सति तंत्रेण नकारनिर्देशोपि संभाव्येत आगंतुनाकारेण तस्यापि ने
इति निर्देशे न तंत्रस्वीकारे स संतंत्रानगौरवमिति न किंचिल्लाघवमिति स्पष्टं भाष्ये आङिन्ती

राम
१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्याशंक्यपरत्वेस्य दिते नेत्य … [illegible] … इत्यादौ नातिप्रसंग इति तत्र … स्वरे स्याः

नि ॥ ङकारविशिष्टा संज्ञा न तस्य ङस्येत्यर्थः ॥ अत एव हरिणामस्येत्यादौ न गुणः एवं मौङ आपदस्य व
नापि अत एवासंभवेत्वाप बादसमितिवा निकृमत पिरमेइत्यादौ न पाइ ॥ घेर्ङिति ॥ सुपि चेत्यतः
सुपीति वर्तते तेन पद्वीति सिद्धम् ॥ न च घेर्ङित्येव सूत्र्यतां ङकारादावित्यर्थः प्रवाहे वेसुत्राङ्या
जयारामुपसंख्यानमित्याङन्देशास्तु ङनइत्येव वक्तुं शक्य इति वाच्यं ॥ मत्यामित्यादौ वाम्यायणेन
घाइसस्यानापत्तेः ॥ अल्लिविधित्वेन स्थानिवत्वाभावात् इत्यग्रहणे तनुबंधुकार्यं स्यानिव
त्वस्य दृष्टमिति दिक् ॥ ङसिङसोश्च ॥ द्वित्वेपि अस्वरितत्वाद्यथासंख्यं न ङितश्चेति नु नाम्नुत्ति ॥ ऋ
तउदित्यत्र ऋः इतानि [illegible] तोति परे पू [illegible] पमित्यर्थे नाग्रतीत्यादौ दोषः स्यादिति ङसो सिस्येव सि
द्धे ङसिग्रहणं स्पष्टार्थं ॥ अत्र घेः ॥ इदुद्भ्यामिति ङिघेः परस्य ङेः रौदौ च्चेति ङिः प्रवृत्ते घेरौदौ च्चेति
वार्थो मा भूदिति अदौ तोस्त परत्वं मुखसुखार्थं इत्युभयाच तस्य लोप इति तयोर्लोपः ॥ न चोतो
विभक्तित्वान्न विभक्तावितिनिषेधात्कथमित्संते ति वाच्यम् ॥ मुखसुखार्थमित्यस्य तदेव प्रयोज

६४

232

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल·शो·
११८

२।३ वैरस्य संतसिद्धान्तरत्ने

नं ननु कार्यान्तरं नापि प्रयोगे श्रवणमित्यर्थो नत्र प्रतिज्ञयैव न विभक्तौ विसर्ग्यतन्त्राप्रवृत्तेः। अतए
वेदृष्टौ पसावेभ्यर्येरसादिनिर्देशाः संगच्छन्ते॥ परित्तुच्चारणार्थानां विनैव शास्त्रमपगमः स्या
न्तदेत्स्यंसकानामपि तद्वदेव निवृत्तिरस्तु किं तस्य लोपविधानेन॥ स्वभावादस्याभयत्रापि सम
त्वात्॥ ध्वनितं चेदं तस्य लोप इति सूत्रभाष्य इति दिव औत्सूत्रे निरूपयिष्यामः॥ नन्वेवमगना वि
त्यत्रोतः स्वरितत्वापत्तिः॥ न च प्रसाया प्रत्ययो विशेषसिद्धे पुनरुक्तेति प्रत्ययग्रहणं कर्तव्य
मितिवार्तिककारो देशिकः प्रत्ययस्वरस्यैव तत्र वृत्तिरिति वाच्यम्॥ तस्याः परिभाषाया लक्ष्यासि
द्धये भाष्यकृता प्रत्याख्यानात्। स्पष्टं चेदं तित्स्वरितमित्यत्र कैयटे॥ अंगस्येति सूत्रे भाष्ये तु त
त्प्रत्याख्यानाय एकदेशिना सोक्ता न तु सिद्धान्तिनेति स्पष्टं तद्वदाभ्रान्तलोप इति सूत्रे भाष्येपि
ध्वनितस्तत्सद्भाव इति चेन्न॥ प्रत्ययग्रहणमित्यस्य विधानकालिकप्रत्ययत्वस्य ग्रहणमित्य
र्थात्॥ अतएवादेशेषु द्विसमाश्रित्य तत्प्रत्याख्यानेन फलभेदो नेतिदिक्॥ अनडुहः सौ॥ सावित

राम
९४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

233

अं स्यात्तिं उरः केणांतिरः रतीअ
नेररूप धेतिदर्शनं

प्रथमैकवचनमसंबुद्धाविति पर्युदासात्॥ नकारान्तस्य उच्चारणार्थ इत्युक्तं तत्कः॥ अन्तो न्यासः॥ अवध्यव
धिमतोः॥ सानासौ स्रह पूर्वो वर्तीइति॥ अत एव शिष्टस्याश्लेषाइति समुदायस्य ग्रासहोदितीसं नं॥ पं
चम्यं नाल्ग्रहणा ग्रहस्यने॥ सर्वनामस्थाने॥ नोपधाया इति ह्लोप इत्यतो दीर्घ इति चानुवर्तते॥
अपृक्त॥ अपृक्त इति पुंस्त्वमविवक्षितं॥ अत एवापृक्ते हलि इति संगच्छते अपृक्तप्रदेशेषु हल्ग्रहणेनैव
सिद्धे संज्ञाविधानमदृष्टार्थम्॥ हल्ङ्याप्॥ सुतिसीति पृथक् पदं॥ हलन्तादिति सुतिसीनां प्रत्यय
त्वेनोपस्थितत्वात्सस्मात्प्रत्ययं विहितं तदादेरित्यस्य विशेषणत्वेन तदन्तलाभ इति भावः॥ एवं ङ्याबंशे द्वेधा
नद्युपस्थितिसाम्याबन्ता नादिस्यर्थो द्रष्टव्यः॥ हल्ङ्याब्भ्यः इमिति॥ रामः इत्यादौ दीर्घान्तत्वाभावान्न दोष
इति प्रश्नः॥ दीर्घात्किं निष्कौशाम्बिरतिखट्वः इत्यादौ ह्यसंयोगान्तलोपस्यासिद्धत्वादित्यतो पाठः॥ मनोर
मायां दर्शनात्॥ सखेति॥ पदमेवं वस्तस्य संबुद्धाविति लेखकं तत्तथापि नान्तलक्षणदीर्घे णोव चि
सिद्धेरत उपधायाः इत्यपेक्षया नित्यत्वेन तस्यैवोचितत्वाच्चान्तेन॥ अचो ञ्णिति॥ मृजेर्वृद्धिरित्यतो
वृद्धिरित्यनुवर्तते॥ इगन्तस्योति चाधिकृतं तदाह अंगस्य वृद्धिरिति॥ रत्यत्यादिति॥ उच्चारणार्थो कारे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
११५

मत्तुपुरुषापस्यादिशब्दावयवः आत्स्यादेशोनङ्स्यादिपरत्वाभावः एतेन पञ्चमर्थस्यादिनिर्देशे नपद्धारणं कुर्वे भ्रमस्तत्र मनोरमो कपपाठः

णकृतयणः प्रयोगस्य स्यानुकरणादतिशेषेणोभयोर्ग्रहणमित्याह सखितीसादि । ङस्यादिपरस्मा
द्द्ष्टः सखिखीतितीशब्दप्रकृतिकएवं संभवतीति भावः । ससखेति ।। नपूर्वनादिति निषेधाद्दृशा
हः सखिभ्य इति टङ्क्न ।। समुदायस्येति । असखीत्यस्य सखिभिन्नावयवा वितिवर्णसत्ताप
स्त्यर्थः ।। अत्र पक्षे पर्युदासेन तद्भिन्नप्रातिपदिकांत्येव ङ्यादेरेव ग्रहणं । हतंसखस्येति वाक्येनदो
षः ।। सिद्धांतिसंमतेतरदंतसंज्ञापक्षे सखिभिन्ना वित्यर्थः ।। पर्युदासमान संप्रथमं सखिशब्दे नरद
नग्रहणं तु न विशेष्यासंनिधानादिति भावः ।। एतत्सर्वं हरदत्तानुरोधेन ।। पस्येति सूत्रभाष्यातुस
खिशब्दस्य तदवयवे लक्षणया सख्यवयव भिन्नयोरितोरित्यर्थः ।। यथा अत्वसंतस्येति सूत्रे धातो
तोरिसेलत्तु घट्धातुपदस्यापि णुग्रहणात् स्यादि सिध्यर्थं धातवयवे लक्षणाक्रियते ।। तदन्तसंज्ञाप वे
क्षेप्यसखीतिष्योरेवविशेषणं ततस्तदन्तविधिः ।। उतश्च प्रत्ययादिति वत् ।। ततश्च सख्यवयव भिन्ने
वर्णान्तमित्यर्थः ।। तदन्तविधिश्च शेषपदार्थविशेषणतया ।। एवं च प्रवृत्ते नैवाघि संज्ञेति लभ्यते

राम
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स

तत्र हि भाष्ये इवर्णस्य ई इति किमुदाहरणं अतिसखेरागच्छति यण् घत्र लोपो न स्यात् नदा मूल दीर्घस्य प्र
र्वोत्तनङ्गत्वेन सखिशब्दस्यात् ॥ अतिदेश विषये प्रतिपदोक्त परिभाषाया अप्रवृत्त्या पसत्तेन
हैलेव तेपि घिसंज्ञा न स्यात् लोपे तु लक्षण प्रतिपदोक्त परिभाषया न दोष इत्युक्तं भवद्वीत्याहि
विशिष्टस्य सखिभिन्नत्वेन घिसंज्ञानिबोधेवेति तदसंगतिः स्पष्टैव ॥ न च लोपे पि लिंगविशिष्ट
परिभाषया दोषः सखिशब्दस्य तदवयवपरत्वेन प्रातिपदिकग्रहणाभावात् ॥ प्रातिपदिकेन
दुपस्थापक पदोपादानं हि प्रातिपदिकग्रहणं व्यसासूत्रे किमर्थं विकृतनिर्देशो न सखिपतिभ्या
मित्येवोच्येताः तिसखेरित्यादि सिद्धमाभूदिति भाष्ये तप्रकृतिकएवायं विहितविशेषणानाश्रय
तो नेत प्रतिपदोक्त परिभाषानाश्रयतो नेवेतत् भाष्यं प्रवृत्तमिति न तद्विरोधः इत्यलं ॥ पतिः समा
रत्यनेसर्येन लीयांनान्तसिः इष्टप्रकारेतो स्यर्थः २ तावकारइष्टतोवधारणार्थः स्मृतिपुराणेषु पतयेसखिने त्यादि व्याकरणानिष्पन्नत्वेनासाध्वेव ॥
त्रिशङ्कावघयाज्यया जनादाविव तयोर्माहात्म्येनासाधुप्रयोगेपि ऋषीणां दोषाभावात् ॥ यात्ते

ऽलितोले अर्थानुरोधाभावात् ॥ तद्धेतुपस्यथनास्मतीति

ल॰शे॰
११६

कर्मण्येवासाधुप्रयोगे दोषाच्च अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात्तेषां तपोबलाच्च पद
मध्येपि तदन्तर्गतत्वपाठे दोषाभावः॥ स्वातन्त्र्ये तेषां प्रयुञ्जाना अस्मदादयः प्रसवयत्येव॥ अत
एव नदीसंज्ञासूत्रे भाष्ये छन्दोवत्कवयः कुर्वन्ती सुक्ता नत्येषोष्टिरस्तीसुतम्॥ यूस्त्र्याख्यावि
ति सूत्रे हरदत्तग्रन्थे स्पष्टतरं चैतत्समासेऽपि सुत्वे बहुव्रीहौ विधेय॥ अत एव पतिरित्येतावदेवेति नास्
त्रि॥ वर्णसंज्ञापक्षे प्रत्यवयवे कारइत्यर्थः॥ तदन्तसंज्ञापक्षे प्रत्यवयवेकारान्त इत्यर्थः॥ सूत्रे पति
शब्दश्च तदवयवेकारेणाक्षिप्तः। एतेन श्रोबोध्यस सखिपती॥ पतिसखीसमासएवेति वासस्य
तामित्युपास्तं॥ यस्येति चेति सूत्रस्थभाष्यरीत्या सुपतिना ससख्येत्यादीष्टासिध्या तथान्या
सस्य कर्तुमशक्यत्वादिति स्पष्टमेवेति दिक्॥ नित्यं बहुवचनान्त इति॥ क्रिमः संख्यापरिमाण
इत्यनेन किंशब्दाद्बहुसंख्यावच्छिन्नसंख्येयविषयप्रश्न एवडतिरिति भाष्ये स्पष्टत्वादिति भा
वः॥ बहुगण॥ संख्याप्रदेशेष्वेतत्संज्ञाकरणाद्वानरूपप्रकरणस्य सहेपि तन्मूलकृत्रिमन्याय

राम
१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

237

स्य न प्रवृत्तिः कुत्तेरिकमेँ स्यादाविव भत एव संख्याया अतिशयदत्ताया इति शददत्तपर्युदासः संगच्छते ॥
न हि शददत्तावृत्तिमा संख्यास्ति ॥ तस्याः संख्याप्रदेशेषु अप्रयुक्तिः । किं च लोकप्रसिद्धमहासंज्ञाक
रणेन प्रदेशेषु लोकप्रसिद्धार्थस्याप्यवगतिरिति स्पष्टं भाष्ये ॥ अत एव पंचपञ्च्यश्चतस्त्रस्यादिसि
द्धिः ॥ एतन्मात्रोपयोगस्तु भ्यासाम्रेडितादिसंज्ञाविषये द्रष्टव्यः ॥ सूत्रे बहुगणग्रहणं तु तयो
नियतविषयपरिच्छेदहेतुत्वाभावे नासंख्यात्वात् ॥ बहुत्वादि हि त्र्यादिसंख्याव्यापको धर्मविशे
षः ॥ अत एव भाष्येण तत्सूत्रमतिदेशार्थं परत्वमसंख्यासंख्येयाहेसतं ॥ एतन्भाष्ये एकादिकुपा
चापि संख्यापत्तेरसूत्रे तस्यायमर्थः बह्वादिकयापि संख्यायत्रिंशदादिसंख्येयासंख्यायते ॥
कतिशब्दोपि संख्या नेवकरणीभूतार्थविषयप्रश्नार्थकत्वात् संख्यानकरणाएवं वर्तते प्रसमूाय
द्धानापि शुद्धेवाभ्यालंकारेणैकादिकयासंख्यायते साऽपि प्रदेशेषु पृथा गृह्येतेति लोकेप्रसिद्ध
महासंज्ञाकरणमिति तदर्थः ॥ एतेनार्थान्तरवाचित्वे सति बहुत्ववाचिनः श्रोतसंख्याकार्यं न बहु

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.कृ.ग्रं.
सं.टी.
११७

गणयोरेवेतिनियमार्थं तत्तेन भूयादीनां न तेषां वैपुल्याद्यर्थान्तरवाचित्वात् वैपुल्यं विशालता
ताविशेष्याविशेषणत्वलाभ्यां बहुत्ववाचिन एकशब्दस्य बह्वर्थमात्रवाचिनां च्यादीनां च न स्या
द्विति॥ यद्वा॥ अनियतसंख्यावाचिनां चेद्बहुगणयोरेवेति नियमः अन्यतराद्बहुवदनन्तत्वा
च्चिन्तात एकशब्दस्य संख्याकार्याभाव इष्ट एवेत्यपास्तं॥ संघवैपुल्यवाचकयोर्नेह ग्रहणं परस्प
रसाहचर्येण व्यादिसंख्याव्यापकधर्मवाचिनोरेव ग्रहणात्॥ वतुडिति सानुबन्धनिर्देशो बा
ह्यणावृदिसादिव्यावृत्त्यर्थः॥ डतिरत्र डितएव वतुसाहचर्यात् स्यैलक्ष्म॥ ष्णान्ते स्यतः षडि
ति वर्त्तते संख्येति च प्रवृत्तं तदाह डत्यन्तेति॥ अत एव षड्डतीति डन्वादेन शुश्चिहितः॥ अ
तएव संज्ञाविधानपि प्रत्ययग्रहणे तदन्तग्रहणम्॥ संख्येति किम्॥ पत्तयः॥ प्रत्ययस्य॥ अ
नेकसंज्ञाकरणात् आवृत्त्या विभक्तिविपरिणामेन च तद्भावितसंज्ञाभ्यपगमतो न संकरः

राम
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेन हन्ती सादेशे श्ला वितिद्धि नतदाह ।। लुक्श्लुलुपश्चेद्रिति ।। अदर्शनं लोपः स्यादर्शन
मित्यनुवर्त्तते ।। प्रदेशेषु भाविसंज्ञाविज्ञानान्नोक्ष्योऽन्याश्रयः ।। एवं संज्ञाप्रकरणादन्यदेशस्य
तेन लोपसंज्ञया आसां समावेशः ।। तेन प्रत्ययलक्षणसिद्धिः ।। षड्भ्यो ।। अशासो शिष्य
लोऽन्तशासो रितिवर्त्तते ।। षड्भ्य इति विहितविशेषणं तेन गोलेन ।। परमपंचेसादौ तु विशिष्टस्या
पिसंख्याप्रकारकसंख्येयविशेष्यवबोधा□मनकलेन संख्यावाचितया षड्समस्येवेति न दो
षः ।। स्यपण्चेदं षड्प्रधानु एव समासः इत्यादिना सर्वादिसूत्रे भाष्ये ।। कैयटस्य तु प्रमाद इत्य
न्यत्र निरूपितम् ।। प्रत्ययलोपे ।। प्रत्ययस्यपस्यनुवृत्त्या सिद्धे आद्यप्रत्ययग्रहणमवयवलोपे
माभूत् ।। तेनाघ्नीयेसादौ नानुनासिकलोपः इति स्पष्टं भाष्ये ।। इदमेव प्रत्ययग्रहणं ज्ञापकम
वयवेऽपि प्रत्ययत्वव्यवहारस्य ।। एवं चादेशप्रत्यययोरिद् दुपधस्येत्यनयोर्लक्षणादिनाश्रय
णीयं सासदाघोरितिचचरितार्थस्थानिवत्सूत्रेण सिद्धे इदं सूत्रं नियमार्थमिति भाष्ये प्रत्यय

ल॰ त्रो॰
११८

स्यासाधारणत्वं रूपं प्रत्याश्रीयते तत्रैवेति ॥ नचैवं दधतीति सद्वेतेति चेत्तर्हि तिङ्किं निपात्यते ॥ भा
त्मनेपदं नैतदस्ति अनुदात्तङि॰ तदस्यैव सिद्धं नियमार्थं तर्हि भविष्यत्यनेवयङ॰ गन्तस्य नात्म
न्नेबोभिदीतीयुक्ते ॥ अस्य नियमस्यैतेनात्मनेपदं दुर्लभं ङि॰ तस्य प्रत्ययपात्रे स्यसाधार
तात्वादितिवाच्यं ॥ आत्मनेपदमित्यस्यैव सिद्धत्युक्ते सा तत्तो विध्यर्थमिदमिति वार्तिकानुसा
रिताऽनुदात्तङि॰ तदस्यैव सिद्धमिति शङ्किते तदनुसार्यं वदे ह्यनवतत्समाधानमित्यदोषा
दित्यन्यत्र विस्तरः ॥ प्रत्ययलोपे प्रत्ययवदिति सिद्धं लक्षणग्रहणं प्रत्ययनिमित्तकमेव न तु
प्रत्ययस्थानिवन्मित्यर्थलाभार्थं तेन न खभिन्नदस्यादावैसादिवं नैयेवेक अतिदेशेनाहार्यलघु
द्धिसंपादनेपुच्चारणप्रसंगरूपषष्ठ्यर्थोभावान्नेसादीति लघ्वर्थमित्यपरे ॥ कार्यमिति ॥ प्र
धान्यात् ॥ कार्यातिदेशोयमिति भावः ईहापि परिवीरितिशास्त्रपरविप्रतिषेधेन परत्वादीर्घसं

राम
११८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
११९

नचोरदत्त्ववत्तनुज्वत्तेपि परनिमित्ताश्रयणात्सिद्धिरिति पञ्चमोऽप्युरत्वस्यासिद्धिरितिवाच्यं।। उरदित्यत्र शब्दतः
परस्य निमित्तत्वेनानाश्रयणेपि अङ्गसंज्ञाद्वारा रदत्वस्यापि परनिमित्तकत्वेन स्थानिवत्त्वप्रवृत्तिरि
त्येव लिघम्यासस्येतिसूत्रस्थभाष्यान्न्यायात्।। नियमतः परवृद्धेः पूर्ववृत्तितया परनिमित्तत्वात्।।
अत एव चर्करीत्यजघांरित्यादाववस प्रवृत्तरचिश्नः इत्यादावजादिप्रत्ययपरत्वार्थं तु अङ्गस्यानिष
ष्ठ्यानिमित्ते इत्यस्याहारेण तस्य विशेषणतया यथाकथंचिदुपपाद्यः अत एव डाराद्याधिकारस्थ
दस्युगत्स्तु पुगन्तार्यं कालुहस्याभावाच्च।। ~~एतेन~~ नायं कालुपक्षेऽप्युरशब्दः प्रत्ययेऽङ्गसंज्ञाभवत्युगसन्तकस्य
चतस्य तृज्वत्त्वं स्त्रियामित्येतावान्यर्थः उरदित्यादौ तु आवृत्त्या ऽत्र प्रातिनिमित्ततापि ब्रह्मेति लक्ष्या
नुरोधान्न तथा प्रवृत्ते लक्ष्यानुरोधादेवेति तदाशयः ~~पदैकवाक्यतयान्वयस्तु सत्तासत्तानामा~~ इति
भवत्यन्यत्र निरूपितं चर्करीत्यजघांरित्यादौ तु न लुमतेति निषेधानित्यत्वात्तत्प्रवृत्तिस्त्वपोरस्या
देगुणवत्।। अङ्गाक्षिप्तप्रत्ययनिमित्तत्वं लुकि भवत्येवेति तुभ्य वेहितं भूहितमित्यादावुवङुपपत्या

गतिरूक्तैवा। पदैकवाक्यतयान्वयस्तु सं

राम
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति न्यमित्युपात्तम्॥ त्रिपुरस्वरूपा इति॥ ङेः प्रथमयोरिति सूत्रे युष्मानित्यादेरेतस्माच्छसोन इत्युपन्या
सपरेण भाष्येण स्वमोर्नपुंसकादिति सूत्रे शिसीनुमादिभिर्युष्मदादादेशानां विप्रतिषेधपरेणावा
र्तिकेन तद्भाष्येण च न षड्भ्य इति निषेधेन च लिङ्गसत्ताबोधनेऽपि लिङ्गबोधकप्रत्ययानुसन्धानरूपेण वि
शेष इत्यर्थः साम आकमिति सूत्रस्थस्यालिङ्गे युष्मदस्मदी इति भाष्यस्य पदान्तरसन्निधानं विना लि
ङ्गविशेषो युष्मदस्मच्छब्दमात्रान्न प्रतीयत इति दिक्॥ त्रेस्त्रयः॥ अयं न सान्तो निर्जरेण त्रयाणामिति
निर्देशात्॥ त्रेरय उ॥ नवृत्तः॥ अयङ् इयीत्यादाविवोच्चारणार्थः सशंकावारणाय। केचिदिति॥ आमि
सर्वनाम्न इति साहचर्यादिति भावः॥ वस्तुतस्त्विति॥ सा चेह पर्यायसार्वत्रिकत्वात्संज्ञान्तरस्थत
दाश्रयणे दृढतरप्रमाणाभावाच्चेति भावः॥ न च गौणमुख्यन्यायेनात्र नेति वाच्यं॥ अप्रसिद्धस
गौणलाक्षणिकसान्यतररूपगौणत्वाभावात्॥ अत एवोपसर्जनानां सर्वनामत्वनिषेधआर
म्भो वार्त्तिककृता इत्तरविशेषणतामात्रेण तत्त्वाभावात् पदकार्य एव तत्प्रवृत्तेश्चेत्यन्यत्र विस्तरः॥ द्वि
शब्दो नित्यं द्विवचनान्त इति॥ संख्यापरत्वेपीत्यर्थः॥ अत एव कस्य द्वितेरित्यर्थे कस्यद्वयोरिति भाष्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल.शे.
१२०

बहुष्विति सूत्रे प्रयुक्तम्॥ त्यदादी॥ अष्टन इत्यतो विभक्ताविम् अनुवर्तते तस्मलं तलुलेम्। सोर्लुक्यतं न॥
इशिरिति॥ भाष्यकारस्येति भावः॥ द्विपर्यन्तानां किमिति॥ युष्मदस्मदोः शाखेयत लोपे वा धा
क्लिमः कादेश विधानात्र प्रश्नः भवता भवता विषभ्युत्र पायङेनुस्वर्ग इति॥ इदं संभावना मा
त्रेण। तवांङेर इत्तौ च समस्यार्थे इति सूत्रस्थ भाष्य प्रामाण्येनानभिधानात्॥ क्लिब न वाते
नि॥ ईसमवकारादाविति वार्तिकस्य पावानरस्यादीनां वनिपासाधनरूपस्य तत्प्रसाख्यान
भाष्यस्य च फलैक्यायेदृशोभ्यः क्विपो नाभिधानमावश्यकमिति धीवरी पीवरीत्यादिघ्याप्यो:
संप्रसारणं च क्विपूर्वनिपूर्वेनेसमर्थका ज्ञनसनखनां सन् इत्यतो घुमास्थागापेति सूत्रभा
ष्यपर्यालोचनुपासिद्धाद्वार्तिकात्स्य कृधी ध्यायते र्दधात वेति क्विपू वचीति वार्तिकस्थ भाष्ये
दधातवे सु नि रेकदेशिनः शास्त्राद्यत्र विजेवेति न दोषः मीङ्॰ माने इतीकारान्ताद्धि विषये

नचास्ति सप्तमी ईदन्तादिति भाष्य संगतेः

राम
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वातप्रमीर्निः॥ भृंगो मृगा इति जैनु विशेषः॥ बहुश्रेयसीति॥ ईयसश्चेति न कप् ईयसो बहुव्रीहे नेति
निषेधाद्गोपसर्जनह्रस्वः॥ पूर्व्या॥ दीर्घयोरेव ग्रहणं व्याख्यानात्॥ वान्त्येसीति पूर्वसवर्णदी
र्घः॥ पूर्विमाञ्जे॥ आ एनघारति न स्त्रियमाचक्षाते स्त्र्याख्यौ मूलविभुजादित्वात् कः॥ स्त्र्याख्या
वित्युपस्थितस्त्रीवाचकशब्दस्य विशेष्यत्वात् तदन्तविधिरित्याह दूरं नावि॥ आद्यीनघोरित्यादौ
नदीशब्दस्य तदवयवे लक्षणा बोध्या॥ आख्याग्रहणात् स्त्रियत्वलाभस्तदाह नित्यस्त्रीलिङ्गावि
ति॥ तत्फलं तु ग्रामण्यादेर्व्यावृत्तिः॥ नित्यस्त्रीत्वं च प्रवृत्तिनिमित्तैक्ये लिङ्गान्तराविशिष्टार्थान
भिधायकत्वं अतः कुमार्यादीनां क्वचिन्निर्वृत्तेन त्रिलिङ्गेन समानाकारतया नित्यस्त्रीत्वाभाववा
रणाय प्रवृत्तिनिमित्तैक्य इति॥ नन्वेवं बहुश्रेयसीशब्दस्य नदीत्वं न स्यादत आह॥ प्रथमेति॥ अ
र्थान्तरसंक्रमात् पूर्वं विद्यमानं नित्यस्त्रीत्वमादाय तस्यार्थान्तरसंक्रमेऽपि नदीत्वं कर्तव्यमित्य
र्थः॥ यथोद्देशे पूर्वं प्रवृत्तसंज्ञामादायैव शास्त्रप्रवृत्तिः कार्यकालपक्षेऽपि कुमारीश्वसादौ प्रवृत्तिभूतकुमारीश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०शे०
१२१

ह्रस्वनित्यस्त्रीत्वेन वृत्तावपि विशेषणतया नित्यस्त्रीलिङ्गरूपार्थबोधकत्वेन नदीसंज्ञा ।। समासे तुल्यत्वेव तदवयवस्य तस्याप्तिः ।। तस्मात्तद्बोधकस्य निवेशे प्राधान्येन तद्बोधकस्य निवेशो वा न मानं ।। तदुक्तं भाष्ये ।। अवयवस्त्रीविषयत्वात्सिद्धमवयवो ह्यस्त्रीविषयस्तदाश्रया नदीसंज्ञा भविष्यतीति आकडारस्थसंज्ञानां कार्यकालत्वाभावादन्यथा तन्नाद्विज्येकवाक्यतापन्नयोः कथं बाध्यबाधभावः स्यादिति बोध्यमेतदपि विवेचितम् ।। हे बहुश्रेयसीति ।। ह्रस्वे कृते गुणस्तु न प्रक्रियालाघवाय बाधीनां ह्रस्वः । ह्रस्वनद्योर्गुण इत्येव वाच्ये ह्रस्वविधानसामर्थ्यात् ।। ज स्थिते सत्येकदेशस्वरितत्वप्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टं ।। अबाधीनामपि गुणत्वं तु वक्तुमशक्यः ।। अनन्तः कौबेरनलेशोवेमातृस्थ ईयो रवीति रभसाद्युक्तानः ह्रस्वस्य बाध्यत्वेन गुणोत्पत्तेः ह्रस्वग्रहणेऽसेच ह्रस्वस्य पस्थित्यास्ततो बाधं ग्रहणान्नदोषः ।। ह्रस्वनपुंसकत्वेपि हे वारे इति वस्त्वक्षे गुणः स्यादेव गुणश्रुत्येक परिभाषोपस्थितौ संबेसादावप्यनापत्तिः ।। अयं

न

राम
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अड्डारंभसामर्थ्यात्पररूपं नेति तु नित्येरामिनुट्बाधनेन चारितार्थ्यादिभाव इत्यिके मिततनत्रधा...कर्त्व इति ...

सपरं तु तद्भाव्ये एव पररूपं गुणोनादइत्यस्मिन्भाष्ये अतो गुणादइत्युत्तरं नादइति पदस्यापीति भाष्ये ...

ह्रस्वोनन्तरस्येति न्यायाद्धूस्वस्य गुणादयैस्येव बाधकस्तेन मातरित्यत्र ऋतो ङीति गुणो भवत्येवेति दि

क्।। अतश्च।। नमाङ्योयोग इति सूत्रस्थ भाष्यान्ते दृश्चेति न्यासे तु वृद्धिरेचीति बोध्यं।। अत्राहुर्नु वन्त

पश्चाङ्कः अस्य पोहस्य नित्यत्र वृद्धिवारणा पाठश्चेत्यत्र धातावित्यपवर्धणानुध्यनापत्तेः।। वृद्धिरेचीत्य

समानाधिकरणे स्त्रियामिति... स्य तु पररूपं बाधकमिति बोध्यं ङः राम ङेरिति सप्तम्यक वचनं व्याख्यानात्।। टहपरत्वादिति।। सवृ

द्धतिन्या याश्रयणादिति भावः।। स्पष्टं चेदं ह्रस्वनद्याप इत्यत्र भाष्ये।। पद्यपीहापवादो नद्याम् सर्व

थानवकाशत्वात्।। अपवादो नुग्दीर्घत्वस्येति दीर्घो किल इति सूत्रभाष्ये उक्तं तु नागमादेशयोरपित

त्वसत्वात्तथापि अनवकाशत्वेन बाधे पवाद प्रवृत्त्यनन्तरमुत्सर्ग प्रवृत्ते न दोषः।। अत एव नगाती

रीत्यमपवादत्वाद्धलादिः शेषं बाधते किं तस्य नवकाशत्वादिति गुणो यङ्लुकोरिति सूत्रभाष्ये उक्तं पा

दः पदिति सूत्रस्थ शब्दान्तरप्राप्त्या अनित्ययोरग्नामोः परत्वादामिति भाष्यं सेव दरपुनरिति बोध्यम्

५६ अङ्गंतत्वादिति।। लक्ष्मे मुंहे स्योणादिर्व्रैसपातत्वादिति भावः।। कुमारीति।। ह्रस्वविधायके शा

अन्ये तु स्नाग्मसमपि भाष्ये हि रोर्यधि हि इत्स्येव बाधकतत्वात् अटः परस्य धातोरनाभाष्यात्त्वनुत्पत्तिरसंभवमिति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल.को.
१२२

स्त्री। योपसर्जनग्रहणात्तु गोस्त्रियोरिति ह्रस्वो न॥ अचिश्नु॥ श्नुधात्वोः युसन्नं प्रातिपदिकं अमेई
प्रसयान्तौ वा॥ रहय्वोरिति धातोः समानाधिकरणं विशेषणं तेनास्तिहेव लौ वर्णान्त धातोरिति॥
ह्रस्वस्येति॥ ह्रस्वं तस्य स्वार्थस्तेन सुभ्रुवावित्ति सिद्धं॥ आन्तरेति॥ स्थानतइति भावः। य्वोरिति किं
वव्रे। अचिचिक्रियुपात्॥ इतीपङीति॥ सुधीशब्दे प्रतिषेधारंभेणात्र प्रकरणे धातोः स्वरूपग्र
हणे इति परिभाषाया अप्रवृत्तिरितिभावः॥ एतेनैकाचो धात्ववयवसंयोगपूर्वभिन्नस्यार्थः तद्धि
न्नस्य धात्ववयवपूर्वत्वेति उद्दिया विश्यादेन दोषः॥ असंयोगादिरेवधात्ववयवसंयोगभिन्नो
स्वरस्येत्यर्थे न सिद्धे पूर्वग्रहणं स्पष्टार्थं॥ एः किं॥ असंयोगपूर्वग्रहणमिव णौ विशेषणं यथा
स्यादद्रू। विशेषणं माभूदिति॥ तेन यवक्रियाविसादेनातिप्रसंगः लुलुवतुरित्यादेनु नातिप्र
संगः। ओः सुपीति नियमात् विपरीतनियमस्तु न सुधीशब्दे इति सुधियावित्येतन्निषेधारंभात्॥
कुमार्यावित्ति। अंतरतरति विभक्त्यर्थछाकलंत्तु अत्रनन: कर इति निषेधात्॥ प्रधीरिति॥ प्रव्र

दीर्घस्योदरूप माताननुकर६

पद्म्या

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टं ध्यायतीति विग्रहे नित्यस्त्रीत्वाभावान्न नदीत्वं प्रकृष्टा धीर्यस्येति विग्रहे तु नदीत्वं॥ ग्रामणीरि
ति॥ अग्रग्रामाभ्यां नयतेरिति णत्वं॥ गतिकारकपूर्वस्यैवेति भाष्ये पठ्यते॥ सच नियमस्तेन
गतिकारकपूर्वभिन्नस्य नेति फलति॥ तद्भिन्नं च तत्सदृशं सपूर्वपदमेव तेन नियतं तु रियादौ यण॥
तदाह गतिकारकेतरेति॥ यत्र च गतिसमासो नित्याधिकारस्थ एव प्रतिपदोक्तः सो गृह्यते इति त
न्न भाष्ये पूर्वपदग्रहणाभावेन समासोपस्थितेरभावेन विशिष्टरूपोपादानविषयप्रतिपदोक्त
परिभाषाया अप्रवृत्तेरत एव नदीसंज्ञासूत्रस्थः प्रकृष्टा धीर्यस्या इति विग्रहाभिप्रायेण प्रवृत्तः
प्रध्ये ब्राह्मण्येइति भाष्यप्रयोगः संगच्छते॥ शुद्धधियाविति॥ शुद्धा धीर्यस्येति विग्रहः॥ शुद्धं ध्या
पतीति विग्रहे यण्णेव॥ आद्ये॥ सत्संपूर्णार्थकधीशब्दार्थविशेषणत्वात्॥ शुद्धस्य कथमपि न
कारकत्वमिति भावः॥ कथं तर्हीति॥ दुर्ध्यायतीति दुष्टा धीर्ध्यानं येषामिति वृश्चिकादौ इति वि
ग्रहाभिप्रायेण प्रश्नः॥ दुःस्थितेति॥ दुःशब्दोपात्तदुष्टत्वस्य स्थितिक्रियाविशेषणत्वमिति भावः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०को०
१२३

प्रकृष्टाधीरित्यादौ प्रकर्षः प्रज्ञाद्यर्थो धीशब्दोपात्तधात्वर्थे विशेषणमिति परमवसेयम्॥ पूत्क्रियेति।
पाचासौ क्रियेत्यर्थः। तं प्रति॥ तद्वाचकं प्रति॥ प्रवृत्तायस्य धातोर्वाच्यया पूतक्रियेत्यर्थः॥ नेहेति॥ तु
लभ्यसंबन्धसामान्यषष्ठ्यैव समासः॥ धीशब्दार्थानामिति हेतुत्वप्रकारबोधे तृतीया बाधनार्थं
विभक्तिप्रकरणे नानुक्तं॥ कारकस्य प्रयुक्तकार्यानापत्तेरिति भावः॥ किं न हेतुत्वविवक्षायां संबं
धत्वेन विवक्षया षष्ठी सूत्रा रं भेपीति बोध्यम्॥ अभ्युच्चयेनाह वृश्चिकस्य बन्धिनीति॥ अत्र पू
र्वपदान्तर्गतोत्तरपदलोपः॥ शाकपार्थिवादित्वात्॥ न भू॥ अनन्तरस्येति न्यायेन रनुकाच भोस्पी
त्यनयोरेव निषेधः सुपीति चानुवर्तते॥ तदाह सुपीति॥ लोपाविति॥ अतो लोपः लोपो व्योर्वलीति
अभ्यामिति भावः॥ यल्लोपे निषेधाद् ल्लोपो न स्थानिवत्॥ वेरपृक्तलोपात् पूर्वं वलि लोपः रक्ष्यते॥ स्था
एवंच निवत्त्वादिति॥ पूर्णादेशो यल्लोपे सवर्णदीर्घ इति स्यादिति भावः॥ अनुवर्ति विभक्त्यापदत्वान्न पदान्तेति
निषेधस्तु न स्थानिवत्त्वस्य नैः क्वचिदितिसामान्यापेक्षनियमेनास्यापवादत्वात् परपदस्थानादेश
नः स्यनेन तदतिरिक्तहलं तत्वारुत्तिरिति केचित् तदसंगतमिति धन पक्ष्याहा सामान्येति
तेनानंतत्वारतिरपि

पथी शा ६ू १ हृदरस्मे

राम
२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येव तेन स्थानिवत्त्वनिषेधाच्च ॥ क्विबपेक्षया संबंधिवल्लोपस्य यणि बहिरङ्गासिद्धत्वं तु नानिसल्लात
धोलुप्तमिति भावे न तुः लोपस्तस्यार्थः ॥ गोमुस्सस्तेर प्रत्यये गोमानिति भाष्योक्तेरस्याप्यर्थस्याव चिरङ्गि
क्वारः क्षोविधिं प्रति नेत्येव तु सार्वत्रिकमित्यन्यत्र विस्तरः ॥ अनाङिति अभिव्यक्तपदार्थाय इति न्याय्य
स्तु गोणमुख्यन्यायवस्य दृकार्यविषयत्वेति भावः । दीर्घस्यापीति प्रयोगस्थ यकारान्तानुवृत्तांस
त्वे ऽकारस्योच्चारणार्थ इति भावः । लुनीरित्यादि । ल्वादिभ्यः क्षायोमः प्रस्तोन्यतरस्यामिति नत्वम
ते भुवः कुप्रचोवरति कृस्वत्वे ॥ व्याख्यानात् प्राधान्याच्च ॥ रूपातिदेशो यमिसाह । नोपूर्व इति ॥
नत्रोदात्तस्वरकारविशिष्टमतिदिश्यते तत्त्वदिति यकारोच्चारणात् ॥ तेन नोष्ट्रस्यादावुदात्तेयणि
इति स्वरसिद्धिर्बोध्या ॥ पञ्चादस्तु नातिदेशः अर्थतभान्तर्याभावात् ॥ इदं सूत्रं स्त्रियां चेति च प्रयोगे
नियमफलकमिति बोध्यम् ॥ अमृत ॥ ननु व्युत्पत्तिपक्षे तृन्ने नत्वात्तृन्नेहा ह्रादीर्घे सिद्धे न प्रादिग्रहणं
व्यर्थमत आह ॥ नियमार्थमिति ॥ अन्येषां पुणादिव्युत्पन्नानां संज्ञाशब्दानां नेति ॥ नेष्टादयो पुणा

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ले·हो·
१२४

इयत्त्वेतिभावः तेषांनृन्निति सूत्रस्थवार्त्तिकेन व्युत्पादनान्न प्राप्तीत्यादि ग्रहणेन प्रयुक्तस्तृजन्तस्यैव ग्र
हणमिसत्र्ये ॥ अव्युत्पत्तिपक्षे तु विध्यर्थमेव बोध्यम् ॥ भाष्यप्रयोगादिति ॥ एवं चोणादिषु स्य व्यु
त्पादनमप्रामाणिकमिति भावः पङ्क्तादिवद्योगरूढोयमेवैणादिकृत्समेवास्य स्वीकृत्य भाष्यप्र
योगादेव दीर्घमिच्छन्ति तेऽमान्याः भाष्यकृतान्यप्रयोगस्योदाहरणात्तेन दानेप्यस्य भाष्यप्रयोग
त्वाभावात् ॥ एवं तृन् च्यादिति भाष्ये तुन्तृचश्च ग्रहणमित्यर्थः ॥ न चाप्तृन्तृजित्यादौ विशेषणार्थः तृन्त्वे
व सिद्धेः ॥ न च तेष्वप्युच्यमाने मातरो पितराविषयादौ प्राप्नोति तत्र हि तृ प्रत्ययो निरनुबन्धक इति वाच्यं
नप्तृग्रहणस्य योनिसंबन्धवाचिनां चेदस्यैव नान्येषां योनिसंबन्धवाचिनामिति नियमार्थत्व
नं ॥ नेष्टृत्वष्टृक्षत्तृहोतृपोतृणां तृन्नन्तत्वस्य प्रशास्तुस्तृजन्तत्वेहास्य तृन्निति सूत्रे भाष्ये दान्तिरूपोरुक्ते
न तेषां ग्रहणं प्रपञ्चार्थमेव एवं च यथान्यासे नियमफलं चिन्त्यं क्रोष्टेति ॥ अनङ् सर्वनामस्थाने
चेति दीर्घः प्रथमोपस्थितत्वात् ॥ क्रोष्टाराविसाद्यर्थं नु तृज्वद्भावः ॥ पद्मा विशेषविहितत्वाच्छीघ्रोप

नां तत्तस्य रूदं नैतद्धितां ने
अव्युत्पन्ने च सत्वेन तृन्तृजन्तस्य उस्य तु रूदं तप
वसत्वेन विशेषविहितं बोध्यम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तरसूत्रस्थम् तृतीयादिष्वाद्यभावस्य २ एकस्मिन्नपि द्वयं नास्तीति प्रतीतेः २

स्त्रियां तु कृते नस एव न्याय्यः॥ विभाषा तृतीयादिष्वचीत्ययमपि नियम एव तृतीयादावच्येवोभयमिति तेन भ्यामादौ
ना क्रोष्टुभ्यां क्रोष्टुभिरित्यादौ च न दोषः॥ सर्वत्र विशिष्टाभावस्य सुलभत्वात् तृज्वत्क्रोष्टुः स्त्रियां चेत्याभ्यां
सर्वनामस्थाने स्त्रियां च तृजन्तरूपविधाने न तयोः प्रयोगनियमार्थं संपद्यते॥ ते तेन तृज्वत्सर्वना
मस्थान एवेति नियमादिदं विध्यर्थमिति परास्तम्॥ न चैवमपि क्रोष्टुनिसाद्यसंगतमस्तु तृजन्तस्ये
न प्रयोगेणाप्युक्तनियमस्य चारितार्थ्यादिति वाच्यम्॥ तृज्वत्क्रोष्टुरिति योगविभागस्यैवं सति वैय
र्थ्यापत्तेः॥ न चैतद्धितेष्वचामादेरित्रो गुणाद्वृद्धिरिति सूत्रयोः क्रोष्टुः क्रोष्ट्रीया इति भाष्यप्रयोगासंगति
रिति वाच्यम्॥ ऋकारान्तस्यैवर्षिवाचकत्वेनादोषात्॥ इदं सूत्रद्वयं तु शृगालवाचिक्रोष्टुशब्दपर्यायव
स्थार्थमित्यवधेयं तदुक्तं भाष्ये तृज्वद्भावविषये तत्तदन्तं मृगवाचीति तृतीयादिविभक्तिपुत्तृजन्तं तु
नन्तं च मृगवाचीति च अनेन हि अन्यत्र तु नन्तमेवेत्यपि सूचितमिति दिक्॥ ऋत उत्॥ सपरत्वं भाष्यमाने
स्यापि सूचितत्वं ... ग्राहकतात्पर्यापन्न ... तत्त्वतो हि मात्रनिवृत्त्यर्थं तेनाम्नुट्स्यादिसिद्धिरिति ... रि
तिसूत्रे वैयर्थ्यपरः॥ यत्तु तपरत्वं ढ्लोपे परतो दीर्घबाधनार्थमिति तन्न॥ सपत्र ... तावान्नाज्ञ्वलिता ... पन्न

क्रोष्टु

253

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहेष्टिरियं भाष्यस्य तद्यतिविरुद्धविरोधात् ऽसति ह्यवोति कृत्वं

न॰ शे॰
१२५

गाः ॥ नैनेतोरस्य भाष्यसंमतत्वस्य सविस्तरमग्र्योऽयथेति रामायणप्रयोगविरोधात् ॥ उरण्परस्तिसूत्रे ऽण्ग्रह
णाभावेऽपुर परर इति भाष्यप्रयोगविरोधाच्च ॥ सख्येवेति ॥ संयोगान्तलोपेन सिद्धे नियमार्थं ॥ तेनो
र्मिसादौ नेति भावः ॥ विपरीतनियमस्तु न पुमानस्त्रियेति निर्देशान्न ॥ एरनेकाच इति सूत्रमोरितिप
के रस्मिन्नुक्ते सानुवृत्ता वृत्तविशेषणं सर्वातिक्रियानुवर्तते रस्याद्धातुस्वयवे याद्दि ॥ गतीति च ॥ सकृत्स्वावि
त्यत्र क्रियाविशेषणत्वेन कर्मत्वाद्यप्रणा ॥ न भूसुधियोरिति निषेधे प्राप्ते आह ॥ वर्षाभ्वश्चेति ॥ वर्षा
भूर्दर्दुरपुमान् ॥ स्वार्थिक इति स्वस्याः प्रकृतेरर्थः स्वार्थस्तत्र भवः स्वार्थे ॥ ध्यात्मा [illegible] स्वग्रा
मस्वाध्याययोः पाठेन स्वशब्दाद्देश्ये देनयोरेवेति नियमार्थे ॥ नेआगमो न पुनर्भूशब्दस्य [illegible] स्य
नित्यस्त्रीत्वादाह ॥ योगिक इति ॥ इत्यदन्ताः ॥ वर्णैकदेशानां वर्णग्रहणे न ग्रहणे रेफाभावादा
ह ऋवर्णादिति ॥ युक्तमिति पक्षे इति ॥ अयुक्तमिति पक्षे ऽवारिषु पाठादीर्घ एव नेति भावः ॥ युक्तमिति
तर पक्षे निरनुबन्धकग्रहणपरिभाषानामवेति रल्लुन्तावेति सूत्रस्य भाष्यस्वरसः ॥ इत्यदन्ताः ॥ वैकल्पि
केति ॥ यत्तदेतेभ्य इत्यत्र स्वरघात्करणादिति देशस्य क्षिप इत्यादेशो धातु [illegible] नुकरणे विभक्तिकरणे न स

राम
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेत्यपि कृतस्य तापना दितिभावः अनुकरणस्यानुकार्येण स्वरूपमात्रमर्थ इति प्रातिपदिकत्वे अनु
कार्यं चानुकरणादिति न मैवेति पतौ छ इति सूत्रे भाष्ये स्पष्टं एवं दानुपूर्व्यपि सर्वेऽपि वाचकः सांहत्यार्
थोपस्थापकत्वमित्यत्र कैयटे प्राद्रीयतो णिसत्र भाष्ये च स्पष्टं अनेनतवकार इत्यादितः कृधातुरिति
बोधः भूसत्तायामित्यादौ लितणवनिर्देशात्कदाचिदनुकरणाद्विभक्त्यभावोपि सच सूत्रेष्वेवेतिमा
माति कृ ग विस्तायमाह इति वा तस्यैवानुकरणमनुकार्य स्वरूपभंगमिया च नवलोपः सलांज सि
त्यादौ नश्चाभाववदित्याह ॥ इत्ये इति किरश्च पचभ्य इति निर्देशाद्धातुप्रत्यये पि तस्मान्नि शिति भावः
कीरिति ॥ कृधातु रित्यर्थः गुणो नेति ॥ ऋत उदित्युक्तमप्यलणेव नातणो व्याय इति सूत्रनिर्देशः संग
छते ॥ रत्यर्धन्ता ॥ अनङिति ऋलृवर्णयोः सावर्ण्यादिति भावः । गमृनिति ॥ लृवर्णस्य दीर्घाभावा
दृवर्ण एवेति भावः ॥ ननु तुल्यास्येति सूत्रे भाष्ये रता ऋति ऋ वेत्यादि विधेययो रेफद्वयगर्भ योर्ऋ
सदीर्घ संगीकारेणात्र द्विलकारर्षत्सृष्टोद्वारः आमिचनथा धातॄणामिख त्रैरेफद्वयगर्भोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिचेन्नभक्तः सवर्णोइति सूत्रेउक्तोत्तरत्वात्॥ ग्रस्येति॥ यत्तुलृलस्त्रे उरणरपर इत्यत्राजितिवक्त
व्येलृग्रहणासामर्थ्यानाण्पूर्वैर्णोवेत्युक्तं भाष्येलृकारस्यपत्तिर्हितत्र लपरत्वार्थं परेणाणग्रहणं
स्यादितिसामर्थ्योत्तिरसंगतान्वत्कारस्य पत्तिलृरोरीतिलोपेननविशेषइति॥ तन्नॠकारस्य
हलृरूपात्तिरोरीतिप्रवृत्त्यापत्त्याभावेनाप्रवृत्तेस्तल्लाहचर्यात् लृकारस्थोपि हलृरूपाएप्रवृत्ति
रिसामर्थ्यात्॥ वस्तुतईदृशानामभिधाने दृष्टमानं चिंत्यं सेरिति॥ इनासहेत्यर्थः॥ वोपसर्जन
स्येतिसहं॥ तकारादेशस्य पूर्वान्तवत्वेपिलिंगाघन्वयार्थप्रतिपादकत्वाद्व्ययमिति महासन्नया
स्यानव्ययत्वान्न विभक्तिलुक्॥ स्यादेशास्यपूर्वमाकृतास्तुन॥ नेन्द्रस्येतिज्ञापकेनपूर्वान्तरपदवि
मितकार्यीस्पूर्वमेकादेशाप्रवृत्तेः॥ नचनात्रेः पादमितिसूत्रस्थे नन्नचैडः पदान्तात्परोहस्वी
तिभाष्येणविरोधात्सावीदृशानां प्रयोगोनुचितः सावपिपदत्वस्य सत्वादितिवाच्यं॥ योगविभा
गसिद्धस्यसौ पदत्वस्य भाष्ये चेत्तत्सेनादोषात्साव प्रयोगएवेत्यन्ये सर्वइति॥ नभास्याप्तवर्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वान्तवत्त्वेन परादिवत्त्वेन सेरस्य प्राप्तं यत्पदत्वं तस्येत्यर्थः ४

अयं भावः सेरस्य परादिवत्त्वेन प्राप्तस्य पदत्वस्य उत्तरपदत्वेति निषेधेपि पूर्वान्तवत्त्वेन प्राप्तं तन्न ङीसंज्ञः भाष्यमप्यर्थवदिति उत्तरपदे नदीत्वे नघटि तस्य सेत्स्यसेऽर्थः ५

र्त्रिं चिभृतस्यापदत्वादेङः पदान्तादिसादिदृशीरमितिवाच्यम्॥ भाष्येस्वादिष्विति योगं विभज्य स्वादिषुपूर्वं पदमित्यर्थः॥ ततोऽसर्वनामस्थाने यचि भमवतमिति अनुवर्तते॥ अयचीति प्रसज्य प्रतिषेधः तेन पञ्चादौ सर्वनामस्थाने पूर्वं पदं न मध्ये चेत्सुबन्तं तदपि पदं नेति व्याख्याने नादोषात्॥ औत्तिदेशिकस्याप्ययं निषेध इति स्पष्टमेव उत्तरपदत्वे चापदादिविधाविति प्रतिषेधाच्च उत्तरपदस्य तदघटितस्य वा पदत्वेवृत्तेर्ब्यन्तवर्तिविभक्तेः प्रत्ययलक्षणेनेति तदर्थो तोनुयोग विभागमूलक प्रत्याख्यानेन फलभेद इति केचित्॥ इतोऽद्विसतोनुवृत्तं सर्वनामस्थाने इति प्रथमया विपरिणम्यते तेति द्वियनेन सामानाधिकरण्यादिस्याहुः सर्वनामस्थानमिति॥ तत्र तितः कार्यस्यासंभवात्॥ तितिपत्कार्यं तदतिदिश्यते॥ ह्रस्वेति॥ अचीत्यधिकारात्तद्धि तद्ध्रासो न ग्रहणमिति भावः गामिति॥ परत्वादत्र वृद्धिरस्तु न॥ अनवकाशत्वेनास्यापवादत्वात्॥ तदाहौतोमिति॥ सत्येतपरकरणेन गस्याविवक्षितत्वमिति भावः॥ तेन चित्रगुरिसा न दोषः॥ अन्यथाङ्गाधिकारे तदन्तविधेः सत्वेनस्था निवत्वेन गोतत्तादोषः स्यादेवमममसौकारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

257

ल॰ शे॰
१२८

त्तसाभावादल्विधौ स्थानिवत्त्वाभावाच्च न दोषः परे तु गोतो णिदिति सूत्रे भाष्ये तत्परत्वं प्रत्याख्या
तं॥ चित्रगुरित्यादौ तु न दोषः गोः पूर्वस्य णित्त्वात्स्वरेषु स्थानिवत्त्वप्रतिषेधात्॥ हे चित्रगो इत्या
दौ तु लाक्षणिकत्वान्न दोष इति अत एव सूत्रे भाष्ये स्पष्टं॥ घोः सर्वनामस्थाने णित्त्वं वक्तव्यमिति
ओतो णित्सूत्रभाष्ये उक्तमित्याहुः। सुगोरिति॥ केवलगोशब्दस्य स्त्रीत्वाद्बहुव्रीहिरुदाहृतः
विहितमिति॥ यदि तु वर्णग्रहणे विप्रतिपदोक्तपरिभाषा प्रवर्तते तेनाद्यर्थोपपत्तेः। स्मृतो
रिति॥ स्मृत उपेनेत्यर्थः। यत्वयवायावादिष्वेकादेश उदात्तेनोदात्त इत्यस्य स्य सिद्धत्वं वक्तव्यं न
म स्थानिकार्यादौ नोच्चरितस्येति वार्त्तिकव्याख्यावसरे वादेशो नास्त्युदाहरणमिति स्वादि
तो वेति सूत्रस्थभाष्यविरोधः प्रकृते पूर्वपदप्रकृतिस्वरेण स्मृतस्यान्तोदात्तत्वे शेषनिघाते
न उशब्दस्यानुदात्तत्वात्तदेकादेश उदात्तेनेत्युदात्तत्वे स्मृतविसादौ तदुदाहरणसम्भवादिति
रन्ततृतीयादिष्वनभिधानेऽपि अन्यत्र तत्सत्त्वे बाधकाभावात् न च गोतो णिदिति सूत्रे घोश्च वृद्धि
र्वक्तव्येति वार्त्तिके घोशब्दस्यैवोपादानादन्यौकारान्ताभावादिति वाच्यं॥ उपलक्षणत्वात्पा

एम
९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदमपि प्राचामनुरोधेन वस्तुतस्तु अस्याप्यनभिधानमित्यवधेयं
॰रि भागुरिरित्यत्र वक्ष्यते ३ इत्साद्यविति। बहुराजे साधोऽत्र बंते बोध्यं

ख्यारव्याने नादोषात्॥ परेशी इत्यानामनभिधानेपि न क्षतिरित्याह॥ रायो हलि। अष्टन आ इत्य
तः आ विभक्ता विस्यनुवर्तते॥ इत्यजन्ताः पुंल्लिंगाः॥ रमेति॥ रमयतेः पचाद्यच्। टाप्। एकादेश
स्य पूर्वान्तत्वेन प्रातिपदिकत्वात्स्वादयः वौ च साद्येन्तु लिङ्। विशिष्टपरिभाषयातत्सान्ते॥ आ
पइति पंचम्यंतं तेन सामानाधिकरण्यादङः स्येति पंचम्यालिपरिणम्यते विशेषणेन तदन्त
विधिरित्याह आबन्तादिति॥ जसः शीत्यतः शीतिवर्तते॥ रमेइति॥ पस्येति लोपो नाभवतीत्॥
संबुद्धौ च॥ बहुवचने सत्त्वात् तदिति आङि चापः इत्यतः आप इति चानुवर्तते॥ एङ्ह्रस्वादि
ति॥ संबुद्धौ प्रतिपदोक्तत्वात् से न शी प्रोक्तस्थितिवत्तया हल्ङ्यादिलोपात् प्रथमं मेले एङ्नेन सं
बुद्धिलोप इतिभावः सन्निपातपरिभाषाया अनित्यत्वान्न अत्र प्रवर्तते॥ आङि चा॥ चेन प्रकृत
मोसि चेति परामृश्यते घेर्ङितीत्यतोनुवृत्तं ङितीसा परति पंचम्या षष्ठ्या विपरिणम्यत इत्या
ग्रायेनाह॥ ङेर्ह्रस्व न स्येति। सर्वनाम्नः स्या॥ भावनात्परस्य सर्वनाम्नो विहितस्य स्वार्थत्वेन
मास्य पूर्वा येरति सिद्धं॥ अत्र ह्रस्वो न स्यात् तत्स्य विधेयत्वेनोद्देश्यत्वासंभवात्॥ नापि ङिद्

स्वादयः

अंगसंज्ञानिमित्तत्वेनैवेत्यर्थः

चेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ श्री॰
१२८

चनस्यव्याख्यानादतआपोन्हस्वइत्याहापश्येति॥ आवंतस्यगतौपाठाभावेनसर्वनामत्वाभा
धादाहैकादेशस्येति॥ न्नहलादिति सर्वनामशब्देनेत्यर्थः॥ नचैवमप्यावन्तत्वाभावः एकादेश
व निष्पन्नस्याप्त्वाभावात्॥ अतएवखट्वस्यादेःपरादिवद्भावेनाप्त्वमाश्रित्यावन्तादितिसोल्लोप
उक्तःपरादिवद्भावेनतत्वंतुनलभ्यमुभयतआश्रयतोनादिवत्वाभावादितिवाच्यम्॥ उभयत
आश्रयणेतद्भावस्यभाष्येएकदेशयुक्तोपिसिद्धान्तिसंमतत्वाभावात्। एतञ्चतिङन्तेइएधा
तौवक्ष्यामः परेतुलिंगविशिष्टपरिभाषयावन्तस्यसर्वनामत्वं॥ आबंतत्वंतुपरादिवद्भावेनेत्या
हुः॥ सर्वस्यामिति॥ इहपरत्वात्स्याटिकृतेसवर्णदीर्घेइतिन्यायात्सुण्न॥ प्रतिपदोक्तस्येति। द्विशब्दमुच्चा मात्र
र्यविहितत्वादस्यनत्वं॥ योन्तरेति॥ अनेकमन्यपदार्थेइतिबहुव्रीहिः सर्वनाम्नोवृत्तिमात्रेइतिगृह
णात्सप्रत्ययसर्वनामत्वेपिपुंवत्वेयोन्तरेतिपतञ्छब्दाभ्यामुद्दिश्यविधेयस्यप्रतीत्यायोनरात्प्रकारक शब्दत्वे
त्वान्विशेष्यत्वाप्रसिद्धपूर्वीयस्यापरस्यर्थेनोत्तरापरस्यगुणवाचकत्वात्सर्वनिपातस्त्वन्यत्रविस्तरः।
स्वपष्टार्थमिति॥ द्विगुमात्रीत्यस्यबहुव्रीसाधिकारेसंख्यादितिभावः॥ अन्तरायेनगर्थ्येइति॥ अपु

राम
२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीत्यस्य पूः शब्दार्थस्याविशेष्यत्वेत्स्यर्थ इति भावः ॥ अत्र मानमन्वेष्यं ॥ हे भं बेति । ह्रस्वेनूते सं बुद्धौ
चेत्येसंन आआविति प्रश्लेषात् ॥ द्व्यक्षरं यदीति पठितसाधुधकांबार्थकस्य वृन्हस्वइति नियममा
श्रित्य इत्त्र कवतां ह्रस्वो नेत्वस्य भाष्य प्रत्याख्याना सफला भेदाय सामान्यतो विवा निकूम संयु
क्तविषयमिसाशये नाहा संयुक्तापूति । द्व्यक्षरं यदीत्यस्याः कुःचाद द्व्यक्षरां वार्थकां नस्य ह्रस्वइति
नियमश्शारीरात्मगदं वेसाही ह्रस्वो भवत्येव ॥ यद्यपि जरसादेशस्येति ॥ एवं चेत्वशीनुट् पाशमा
नित्यता स्त्रं वे मेषु सूते षु क्वचिदनादित्वा भावात्ल चित्सु निपातपरिभाषया जरसो नापतिरि
तिभावः ॥ यद्यपि ष्वाशमोजरस वेक्षया परत्वात्तयोः स्तयोराहे ऽगादित्वविघातादन्ये
सन्निपातपरिभाषया न जरसः प्राप्तिरेवमेते पि तथापि तेन प्रश्लेषफलं दर्शयितुमाह ॥
तं वमिति ॥ अंत्र यदूत्वं तन्निर्जरशब्दे उत्तेत्वाश्रयमिति ॥ स्वंभू समाल आकारः स्थानिवद्भा
वेना प्रवमिनचद्या प्रगृह्यतो दीर्घ आदेशो नस्थानिवदिति ह्रस्वो भास्वस्य विच्छेदात्तथं दीर्घ

नवैवंभवि ध्ये

पंचसं स्यां

लि

काशमे त्सानां परत्वान्नुट् पो भाष्य प्रामाण्ये नस्पर्धविप्रतिषेधे नेष्टत्वात्तेपुस्तेषु क्वचिदशाग्रहाभावात्क्वचित्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल°शे°
१२८

स्थानिवद्भावेन तत्त्वाम ।। इच्छापूरस्थानिको दीर्घभिन्न आदेशो न स्थानिवदिति तदर्थ इति वाच्यम्
याशाप ओ ३ आप आ ३ इ । यापो ३ इ । राम्न घा पुह्लस्या विधीयते ऐच्छाकारप्रश्लेषमाश्रित्य स्थानिव
त्वनिषेधप्रत्याख्यानं भाष्ये न युक्तं कासते नादोषात् । अत्र यत्रोदाहरणे सूत्रभाष्यवार्त्तिका
नां परस्मैपद आपततीति तेषामनभिधानं यथा तिरवद्धस्य अः अतिरवद्धाइ स्यादेः वक्ष्यमाणरी — वक्ष्ये
त्या दीर्घात्पूर्वं प्लुताभावेन स्थानिवत्त्वाप्रवृत्तो प्लुतमेद्देस्यैवाभावाच्च ।। पदान्ताकारान्त इप्र
श्लिष्याकाररूपतया यो न कदाचिद्रूपान्तरं प्राप्तस्तदर्थ इति तन्न ।। मानाभावात् ।। भाष्ये न
स्यानुक्तेश्च ।। आवन्तं यद ३ मिति ।। प्रश्ने प्रगृह्यत्वादिति परिभाषया तिरवद्धस्य नावन्तत्वं
पक्षावन्तत्वं देतीन तद ३ मिति भावः । न चानयावन्तग्रहणेन नाइ ३ विशेषणं दावन्ताः
ग पदमित्यर्थादतिरवद्धाये सादौ दोषस्तदवस्थ इति वाच्यम् ।। अ ३ स्य विशेषणत्वात् ।। ए
नचपदं ।। पिकारइतिपरस्माषपा । सत्वात्पूर्वविरोधणत्वमितिवाच्यं ।। आकारप्रश्लेषपरभाष्यप्रामाण्येन
...तदभ्युपगमात् ।। नचरपद्धायाआ ३ इ अ ३ इ रवद्धाया जिमादेयाऽनापत्तिरितिवाच्यं ।। — राम
२९

इह चेत्यं आतोनुपसर्गे क इत्यादेः ... आदे ... कलादेवा ...

५ तैँ श्रुतमाकारमादाय स्मृतमनुबंधमादाय आत्वानुसंधानास्यादेवपाडिःपा ... तस्य लाक्षणि
कत्वाच्च ॥ ननु स्त्रीप्रत्ययेवाचिन कस्तदादिविधिनिषेधो भाष्ये पठितस्तत्कथं अस्य तत्र प्राप्तिर
तआहोपसर्जने नेति ॥ स्त्रीप्रत्ययेवाचिनकस्तदादि नुपसर्जने नेति वचनस्यैव भाष्ये पाठादितिभा
वः अत्रोपसर्जनत्वं लौकिकमेव ॥ स्त्रीप्रत्यये शास्त्रीयोपसर्जनत्वासंभवात् ॥ यद्यपि स्त्रीप्र
त्ययान्ते शास्त्रीयोपसर्जनत्वमस्ति तथापि नतेन प्रत्ययग्रहणे इति तदादिनियमप्रसक्तिः ।ए
तत्सर्वं व्याख्यादर्शाद्यनुरोधेन ॥ परेत्यस्याकारस्य लाक्षणिकत्वाच्चात्र पाठेवर्णग्रहणेपितत्
प्रवृत्तेरोदिसादौ भाष्ये स्पष्टत्वात् । न च खट्वायेइत्यत्र पाठेनापत्तिः सूत्रं तु निर्देशाये इत्यादौ चरिता
र्थमिति वाच्यम् ॥ यस्य रूपस्य लक्षणप्रवृत्तिं विना न संभवस्तस्यैव लाक्षणिकत्वस्य तत्परिभाषा
विषयत्वात् ॥ न चेह तथा एकादेशात् प्रागपि तद्रूपसत्वात् । पदाङ्गाधिकारे इति वार्तिकेनाङ्गस्य
विशेष्यतापत्तेर्वोचित्याद्बोधनाच्च ॥ अतएवावेत्वान्तं यदङ्गमित्यर्थो मिप्रायेणालिखट्वाये

अंगस्य विशेष्यत्वात् ॥

इह चित्ते ... प्रत्ययान्त ... ।
... ... पुनः ...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व॰ शे॰
१३०

ओऽस्त्वागस्यविरोधणात्येप्यस्योपपतेरी...कि...आये रस्यतेचि...

स्येतसिद्धये तिखट्वाः इति स्थितेप्रवृत्तं आप्रग्रहणे ऽदीर्घ इति वार्त्तिकं व्याख्यायप्रश्लिताकारस्यला
नुबंधाभ्यामास्थिनाशंकां कृत्वा लाक्षणिकत्वेन समाधायाकारप्रश्लेषेण तत्प्रत्याख्याने एत
त्परिहारायोपायान्तरं कथं न भाष्ये। किंच अकः स्यविशेषणत्वे वार्त्तिकस्य तत्प्रत्याख्यानाया
कारप्रश्लेषस्य च वैयर्थ्यं स्पष्टमेव। किंच खट्वायां अतिखट्वायामित्यादौ याऽनापत्तिः। किंचा
कारप्रश्लेषपक्षेपि दीर्घोन्तरं खाश्रयाकारत्ये स्था निवद्भावेनाख्यमितिशंकाऽयुक्तैव दीर्घाल्पूर्वं स्था
निवत्त्वस्य फलाभावादप्रवृत्तेः स्थानिन्याख्यबुद्धेरभावात्तदादेशे दीर्घे तदारोपस्य दुर्लभत्वात्॥
परंपरयाकार्य्यमादाय स्थानिवत्त्वप्रवृत्तेर्मानाभावात्॥ याडापइति सूत्रे भाष्येपि अतिखट्
वायेत्यत्र स्थानिवत्त्वात्प्राप्तस्य याटः प्रतिषेधो वक्तव्यः न वक्तव्यो आप्रग्रहणेऽदीर्घ इति
स्थानिवत्त्वनिषेधात्॥ न च दीर्घसंभावसोभूत पूर्व इति याट् प्राप्नोति लाक्षणिकत्वात्॥
स्थानिवत्त्वे तु तत्सामर्थ्यान्नेतरपरिभाषाप्रवृत्तिरित्युक्तं यद्यपि स्थानिवत्त्वं याडापइति सूत्रस्थ
मानानाकादिभो ...एवं सति गाध्यालोर्लिटि तिपेण लित्त्वफलाभावात्स्थानिवत्प्रवृत्तौ तस्य औ इत्यादेशो द्वित्वे

राम
२०

न्य

भाष्याभ्यां हल्ङ्याप्सूत्रपाठाप इति सूत्रयोरेव प्रश्लेषो लभ्यते तथापि भाष्यमुपलक्षणमितरसूत्र
विषयोदाहरणानभिधानं वेत्यनयोर्युक्तं सुधीभिर्विचार्यमित्याहुः ॥ अश्व ॥ अत्र राजिसाहचर्या
द्राजिः फलादिरेव तेनास्य विभागियेवेत्याहुः ॥ छशोवर्णोताभ्यां शब्दरूपविशेष्यमादायतदन्त
ग्रहणमित्याह छशान्तयोरिति ॥ छशयोरित्युक्तेपि न क्षतिरिति चिंत्यं ॥ पदस्येति तु पृष्टमित्या
दिसिद्धये व्याधिकरणमेव ॥ अन्तादेशइति ॥ अलोन्त्यस्येति वचनात् ॥ अत्र झलो झलीत्यतो झली
ति पदस्येति स्कोरित्यतो न्ते इति चानुवर्त्तते ॥ खो ॥ ऊडित्यत्र विंतीत्यनुवृत्तेः प्रष्ठस्याप्यादेशाभावा
त् ॥ अशान्तत्वेन षत्वाप्राप्तेश्छग्रहणं ॥ अत्रापि सलुक्निर्देशो बोध्यः ॥ तस्या सिद्धत्वादिति चयो
द्वितीया इत्यस्य नादित्येति भाष्यपाठादिति भावः ॥ टनयोरिति ॥ धुडभावे टस्य धुडिति तस्येत्यर्थः
नभवतीति ॥ जश्त्वात्प्राक्षस्यनेत्यर्थः जश्त्वे तु प्राप्तिरेव नेति बोध्यं ॥ केचिदिति ॥ एकाचइत्युर
सत्रेनुवृत्त्यामध्येपि संबन्ध एवोचितइति भावः ॥ जश्त्वेनेति पलुजश्शसशीति निर्देशात् शस्यन

ननु प्रत्ययलक्षणेन ग्रहणातिरिक्तविधौ भावात् छत्वरूपाद्याहाराभावे विकृतपदस्येति विशेष्यमादाय पर निर्दि
ष्टं तद्विधिः कृतो न तथाचभ्रंशे विद्यमानस्य सलिपरे च विद्यमानस्य छशान्तस्य परस्येत्यर्थे सिद्ध

ष्यामिति भ्रंते विद्यमानता चवर्णाभावाच्य
वहितप्राक्कालवृत्तित्वरूपा वर्त्तते परे पि वर्त्तते सा त्वेत
न्नाह परस्येति व्यधिकरणमेवेति छशयो रनन्वयि भ्रं
ते इत्यत्रान्वयीत्यर्थः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श.शु.
१३१

जस्वमिति तन्न॥ अविकृतस्वरूपप्रतिपादने तात्पर्यादयस्मापादित्ते नभत्ता अनन्तरतदप्राप्तोन्यायप्रसिद्धा
यांज्ञापकत्वायोगात्॥ उपदेशेजित्यादिनिर्देशः कृत्वाद्यनापत्तेश्च॥ अत्र मते भाष्यानुग्रहो विचार्यः
मांसपृतनेत्यस्य पद्दन्निति सूत्रे उपसंख्यानत्वात् हाहाइसाद्येवेति स्त्रीत्वादि तिपुंस्त्वाभावादित्यर्थः
नात्वं नेति स्त्रीत्वादिस्य नुकृष्यते अत एव पुंस्त्वाभावान्नत्वाभाव इति नोक्तं। नहि पुंस्त्वाभावो नाभावेत्र
ति बंधकः नपुंसकेपि तदङ्गीकारात्॥ ङितिह्र॥ अनुवाक्यद्वयमाये पूरुति स्त्र्याख्याविस्त्यस्त्रीतिइ
यङुवङ्स्थानाविति वेति चानुवर्त्तते॥ अंतेपूरति वेति स्त्रीवाचकावित्येतावन्मात्रार्थकस्त्र्याख्याविति
च तेन ह्रस्वयोरप्राप्ते दीर्घयोस्तु नेयङ्ङि.ति निषेधादप्राप्ते विभाषा। इष्वादिषु प्राप्तिमाशंक्य ङिति
ह्रस्वश्चेत्यत्र नित्यस्त्रीलिंगावित्येवं विधो नियमो नाश्रीयत इति केयटस्तु ह्रस्वांशमात्रे विषय इत्या
शयेनाह॥ नित्यस्त्रीलिंगाविति॥ अत एव वास्यादीर्घाद्रो निषेधविकल्पयोर्भाष्य उक्तं. पूरुस्त्र्याख्या
विति सत्रे तत्स्वलंकरणायेत्सुवेब्राह्मण्यै इति लिंगान्तरविशिष्टार्थाभिधायकत्वेन तत्त्वाभावात्॥

राम
३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारेसत्र विकल्पोभावस्यैव॥ आख्याग्रहणरहितस्यैवात्र संबंधात्॥ यद्वा स्त्र्याख्यौ विशेषेतदेव
स्त्रीवाचकौ विशेषेतन्मात्रार्थक मत्रशब्दाधिकारात्॥ तत्र ङिदाश्रिमाङ्कः स्यविशेषणं अतएव
वप्रथमलिंगग्रहणं चेत्यस्यानप्रवृत्त्याख्यायके ह्रस्वोचेयङुवङः स्थानौ चप्रवृत्तौ स्त्रीव
चनावेव नदीसंज्ञौ भवतो न तु पुंवाचकौ विति विवक्ष्यमिति वार्तिकेति शकघेब्राह्मण्यै कुमा
भूत्॥ अतिशाकटपेब्राह्मणायै अतिश्रियैब्राह्मण्यै श्रियैब्राह्मण्यै धःमाभूत् अतिश्रियैब्रा
ह्मणे॥ श्रियैब्राह्मणायेति स्त्र्याख्यौ विति सूत्रशेषेभाष्येऽउक्तं एवंचास्यानिषेधविकल्पस
मसंभवि॥ समुदायस्यत्वेनापि प्राप्त्यभावात्॥ अवयवस्य प्राप्तावपि नस्थानेन विकल्पाभावा
त्॥ ङिदाश्रिमाङ्कः स्यैवानेन विकल्पात्॥ एतत्सप्रवृत्तौ स्त्रीवचनाविषयेनेन सूचितं॥ अत
एवात्र वाक्यद्वयेऽपि विधिविकल्प एव दर्शितः॥ एवंचात्र नियमो नाश्रीयत इति कैयटोवाक्य
द्वयपरत्वोचितः॥ उपक्रमे निषेधपरतया व्याख्यानं तु स्त्र्याख्याविषयस्य नित्यस्त्रीत्वार्थकं

267

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ग्रौ॰
१२२

तमतानन्तरत्वादेशिनो पूर्वाते ह्रस्वयोग्रहणमिति पक्षोपपादने ऽप्तिभूतमिति तन्नादरणीयं॥
यत्तु दीर्घवाक्ये स्त्र्याख्याविति। इदूतोस्तदन्तस्य वा विशेषणं पुनरङ्गेनैतदंतविधिः अङ्गस्य च
केवलं स्त्रीसं विशेषणं नेह स्वघटितवाक्ये पि स्त्रियामित्येतन्मात्रमुभयोर्विशेषणमिति
तन्नु चिंत्यं भाष्यानुदलाभात्॥ नेयङ्वङि स्यत्र तु नेयङ्नपाक्षिप्ताङ्गविशेषणं स्त्रीत्वं तदाक्षि
प्तस्य यङादि विशेषणतया चिसोत्॥ यस्याङ्गस्येयुवाविति भाष्योक्तेः स्त्र्याख्यावित्यस्य
नित्यस्त्रीलिंगावित्यर्थकस्य पूर्वस्यनेनैव लब्धसंबंधसौच्च॥ अत एवातिश्रिये ब्राह्मणायेत्य
त्रानेन निषेधादेव यव नदीत्वप्रयुक्तापि नदीकार्यं न॥ ननु यथा स्तरकुंघे ब्राह्मणायेस्यादौ लु
वन्तस्य स्त्रीलिंगत्वेपि प्रथमलिंगग्रहणान्नित्यनदीत्वं भवतीति भाष्येउक्तं च अन्याब्राह्मणान्य
इयेत्यादौ पुंवद्भावेन स्वलिङ्गप्रयुक्तकार्याभावस्याप्यतिदेशान्न तत्संस्पष्टं चेदं तस्माच्छसइति न

औ
स्त
नि

राम
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं

ल

सूत्रे भाष्यकैयटयोः षष्ठ्यातिदेशेन प्रकृतिलिङ्गःप्रयुक्तकार्यातिदेशेन तद्धिरूढत्वाभ्युपकार्या प्रवृत्तिः
स्पष्टं चेदं स्त्रियामिति सूत्रे भाष्ये।। पुंवद्भावो वादिप्रत्याख्याने पि यथोदारादिशब्दैः पुंस्त्वेन स्त्री
रूपार्थस्य भानं तथा प्रकृते स्त्रीत्वे नपुंसो भावमिति न नत्वं।। पुंस्त्वे वा चेन्न तस्मिन्नर्थात्।। न चैवं
स्वकुटेरस ज्ञापि युक्तवद्भावेन नित्यस्त्रीत्वात्तत्सत्त्वे तेव सिद्धमिति वाच्यम्।। स्त्र्याख्याविषयस्य स्त्री
त्वविशिष्टमेव प्राहेत्यर्थात्।। नचायं तथा स्त्रीत्वे न रूपेणा वस्तुतः पुंस्त्वविशिष्टस्याभिधानात्।।
यद्यपि पदार्थमात्रे शास्त्रीयलिङ्गत्रयमस्ति तथापि व्यक्तिवस्तुपदार्थादिबोध्यत्वकाले तत्तल्लिङ्गं
पञ्जननेपि स्त्रीपदादिबोध्यत्वदशायां तत्सत्त्वे मानाभावात्।। प्रकृते तु ब्राह्मणायेत्यादि विशेषद
र्शनेन तत्सत्तानुमानात्।। स्पष्टं चेदं भाष्यकैयटयोरेवं श्रीशब्दाल्लिनि तु पिप्रिये ब्राह्मणायेत्या
दौ विकल्पापत्तिः युक्तवद्भावेन स्त्रियामंगस्य वर्त्तनात्।। अत्र सूत्रे नित्यस्त्रीत्वानिवेशाच्चेति च

269

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्व.टी.
१३२

बाधादिति निरवकाशत्वादित्यर्थः । नचेयङ्वामित्यत्र नदीग्रहणानुवृत्तिपर्यालोचना भाविइयङ्वामोरित्यनेकविषयत्वेन बाध्यबाधकभावो वक्तुमशक्य इति वाच्यम् ॥ तयोरेकविषयत्वे इयङ्वामोरुक्तेति न्यासेन तत्र

न्नसत्त्वाभिधाने इष्टापत्तेः ॥ भाष्ये दृश्यमानं श्रियै ब्राह्मणायेत्यादि न क्यङन्तात् क्विपि बोध्यं ॥ विपरी
तं नित्यस्त्रीत्वनिवेशादिनोक्तं श्रियै ब्राह्मणायेत्यादौ न दनापत्तिदोषः स्यादुः ॥ पूर्वमात्रे ॥
यद्यपि पूर्वतिदीर्घपरं तथापि विभक्तिविपरिणामेन यथोर्हे स्वावित्यन्वयो बोध्यः ॥ तेन स्वर्वेवा
तेर्यून स्तिशितिनिर्देशाच्चेत्याशयेनाह इतियुकारस्येति नच कार्यकालपक्षे इग्यण इत्युपस्थितस्य प
देश्वाक्यतयान्वये निमित्तस्य यणश्च येन नाव्यवधानन्यायेन पूर्वस्य संप्रसारणप्राप्तेरिदं
सूत्रं व्यर्थमिति वाच्यं तत्पक्षेऽपि संज्ञासूत्राणां वाक्यभेदेनैव संबंधस्योक्तत्वात् तया विधायकेषु यणार
ण्यस्याभावात् अत्रेदमपि ज्ञापकं बोध्यं ननु सकृत्प्रवृत्त्यैवोभयोः संप्रसारणे जाते निषेधो व्यर्थो नि
भिमत्तानुपरनिश्चयितेनाह अत एव ज्ञापकादिति तदुक्तं भाष्ये इहेङ्गितेन चेष्टितेन निमिषितेन महत्

309

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नग्रो.
११५२

एतत्कालेऽ   नत्यावैतत्विसितादृितेनस्यादतआह

तावासूत्रप्रबन्धेनाचार्याणामभिप्रायो गम्यते एतदेवतापयतिपरस्य पूर्वं भविष्यतीति लक्ष्ये लक्षण
स्येति न्यायस्य तु नायं विषयः कार्याश्रयवर्णभेदेन लक्ष्यभेदात् भवं गास्ते नतु सावित्ति पर्युदास एवतत्
चिन्नः प्रत्ययत्वेन च साहश्यम् अन्यथा इति बहुव्रीहिर्वा नमवर्णस्त्विति वर्त्तिप्रयोगात् तत्पुरुषे त्वनञः परस्य
वर्ण इत्यर्थे न स्यात् सूत्रे प्रथमैकवचनं अनञः किमिति अनञ इत्यस्य कः शङ्क्याव्यावर्त्य इति प्रश्नः उत्त
रमनवैति यञ्वशाद्भसहशोऽनवैनु शङ्क्योव्यावर्त्य इत्यर्थः ननु इह निरनुनासिकोऽकारोऽपि तपरसूत्रस्या
नणीव विधीयमानेऽपि विध्यर्थत्वात्तस्यानरसम्प्रदनुनासिकस्यात् तपरसूत्रे प्रत्ययग्रहणानुवृत्ते
च मानाभावादत आह भाआदिति विशेष्यविशेषणभावेनान्वया त्रसवर्णादेश इति भावः भाष्ये सनुना
सिकविधाने प्रतिपत्तिलाघवाय तस्यैवोऽकारणे कार्ये तदनुज्ञाणान् त्र शुद्धस्येव विधानमित्युक्तं ॥
केचित्तु इदं सर्वं गुणाभेदका इति पक्षे वृद्धिरादैजु सूत्रभाष्ये संमतेऽसिद्धान्तत्वात् तेगुणा अभेदका
इति पक्षे च तस्मात् तस्यापि सवर्णग्रहणास्या प्रत्ययग्रहणेन निषेधेनादोषात् अत एव भाष्य
न परस्तत्कालस्येति प्राप्नोतीत्युक्तं अप्रत्यय इति चैवावचभेदेन सर्वं प्रतिबध्यकं   अणुग्रहण

जातिपक्षे·

राम
५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञापकत्वं

स्यचेतन्त्रासंबंधइतितदाशयः अतएवभाष्येभाष्यानेनसवर्णानांग्रहणंनेत्येवपठितंनसवर्णेति॥
ततदेवाभिप्रेत्याणुदित्सूत्रे ननयापरिभाषयाऽप्रत्ययग्रहणवैयर्थ्यमाशंक्याप्रत्ययग्रहणस्यात ण
त्परिभाषाज्ञापकत्वमुक्तं तेनचतस्या [illegible] सूचितं अप्रत्ययग्रहणस्यमद्दुक्तरीत्याव्याख्यानंच थ
सूचितंतेनजातिग्रहणात्प्राप्तस्यगुणाभेदेस पक्षप्राप्तस्यानयोणानणसाधारण्येननिषेधइ
तिसूचितं वस्तुतोऽणुदित्सूत्रस्थाप्रत्ययग्रहणंज्ञापकमस्यपरभाष्यस्यैकदेशानुमतिद्वारापरिभा भा
बोध्यतइत्यर्थः प्रतीयतइत्यस्यविधीयतइत्यर्थोप्रसिध्याश्चैयदेतद्व्याख्याचिंत्यापरिभाषायांस
वर्णपदेनसमानजातीयोभिन्नधर्मश्च्युतेतेनजश्त्वादिविधौनतादिजात्याश्रयसवर्णजकारादिग्रह
णासिद्धिरित्याहुः एतेनपथीयतेः ह्रिपिपथाइत्यादीत्यपास्तं अत्रभृङ्गार्थंतरन्तुच्चारणस्यावश्य
कत्वेनभाष्यासंगतेः तस्मात्तदनभिधानमेवोचितंनच आदित्येवास्तु नकारेकारयोरत्वेसवर्णदीर्घे
णरूपसिद्धेः पररूपत्वेन पथिमथ्यृभुक्षालोपः भस्यटेः इत्योसर्वनामस्थानेइतिन्यासेननकारा
श्रवणसिद्धावकारविधानसामर्थ्यादितिवाच्यं ज्ञानगौरवपरिहारेणस्पष्टार्थमाकारोच्चारणात्।

311

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रतोत् आदित्यनुवृत्त्यैव सिद्धे द्विवचनं ञ्रुभुक्षणामित्यादौ वा षपूर्वस्येति दीर्घविकल्पपक्षे ह्रस्वश्रवणार्थम्
रत इत्युत्वमिति चेत् परत्वात् सुखमुखार्थं तरदित्युक्तौ तत्रालाघवाभावात् अन्यथा विधेयेपि तपरकरण
त्वं रूते रसादौ गुणाभाववदन्यथा नाविद्यादौ दीर्घाभावापत्तिरित्यन्यत्र विस्तरः थो न्थः थोनुकि
नौ सर्वनामस्थाने पाणिनीयस्य चानुसंधाने प्रक्रियागौरवात् भस्य टेः भस्य किं पथिभ्यां संबुद्धौ नपुं
सकानामिति इदं न लुमतेति निषेधानित्यत्वमूलकमित्युक्तं यद्यपि भाष्ये वा नपुंसकानामित्येव पाठ
स्तथापि सूत्रे इङ्ग्रहणस्य प्रत्याख्यातत्वेन हे चर्मन् हे चर्मेति संबुद्धावेवोदाहरणं नच तावन्मात्रे
विषयतास्येति भावः ष्णान्ता तिसृ षट्संख्या स्त्रीलिंगनिर्देशात् प्रकृतं संख्येत्यावृष्यते संख्याश
द्वे नच संख्याप्रकारबोधजनकाः पंचादयो गृह्यन्ते संख्येति शब्दे बहुगणवतुडतिषु च तद्वत्वसा
संभवात् तद्ग्रहणं संख्येति संनिपातेति स्पष्टं चेदं भाष्ये नोपधा नलोपस्यासिद्धत्वान्नामीति दीर्घो प्रा
प्तेरयमारंभः नामीत्यस्याङ्गविशेषणत्वे वसापानामः प्रत्ययत्वादेव च पंचानामित्यादौ पक्षान्तरा
रस्य दीर्घवारणाय उपधाग्रहणं नेति किं चर्मणां नलोपप्रसक्ति अंवः पंचानामिति लिंगात्र स

पञ्चानामिति लिङ्गात् सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषाया अनित्यत्वं ज्ञाप्यते ... सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ... इति भावः ...
भाष्ये प्रामाण्येन सन्निपातलक्षणो विधिः सन्निपातस्य ... सन्निपातपरिभाषा ... अनित्यत्वं ...

निपातनपरिभाषाविरोधः अण्नआ अनएला ग्नानुनासिक इति भाष्ये स्पष्टं। जातिग्रहणे न गुणाभेदकत्वेन
नुनसः भाव्यमानत्वात् शुद्धोच्चारणादिति तु नानुवृत्तकुश्चकच रायोहलीत्युनरार्थं तस्य चारितार्थ्यात्तु प्रश्ले
षेणापि न निर्वाहः वाच्यवृत्त्यानुनासिकव्यावृत्तेस्तेनालाभात् प्रसक्ततत्रापि गुणाभेदकत्वादेर्दीर्घत्वेना
न्तरम्यारनुनासिकस्यैव प्राप्तेः प्रश्लेषस्य पर्यायेण सकृल्लाकारविधानार्थसंस्वात् एवमन्यत्रापि बोध्या।
रायोहलि इस्यतो हलीत्यपकृष्यते अण् भाष्य ओरर उ-उ- तितु नोक्तं सकारस्योकारे अण् अउ इति स्थितेहणर
ङि-श्री नामाद्गुणः सवर्णे दीर्घत्वादिति न्यायेनान्तरङ्गः सात्सवर्णे दीर्घेन तत आद्गुणे ऽचाविसस्याशिध्यापे
नेः हलीत्यपकृष्य सूत्राकारादित्यनुपपन्नमत आह सत्ताकेति सूत्रासानुकरणमित्यर्थः लक्ष्यानवशासंपन्न
होहि तस्यैवैकल्पिकत्वया लाघववादेष्टभ्यस्त्येव वदेत् इति भावः ज्ञापयतीति अयं भावः हलीत्यपकृष्यमा
तांवाक्यभेदेन पुनर्विधानार्थं तेनाष्टन इत्यस्य क्वचिदस्य प्रिप्रवृत्तिरिति भाष्यमिति भाष्यमात्रमित्यर्थः दी
र्घोन्तादष्टनः पराऽसर्वनामस्थानविभक्तिरुदात्तेति तदर्थः ज्ञापकादिति तद्धि अष्टभिरिति ह्रस्वे ऽतो दी
न्याख्यावृत्त्यर्थं एवं च नेहत्वव्यावृत्त्यर्थं क्रियमाणे दीर्घग्रहणमाहवैकल्पिकत्वे ज्ञापके न चाष्टाभिरित्यत्र सा

... यत्र प्रक्रियागौरवाभावः। वस्तुतस्तु ... कीर्तिबोध्यं
वर्णपाठसङ्ख्यानां ... प्रक्रियागौरवं च ... नाद्रियताम् इति ...

३१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
॥५५॥

वकारान्तस्याट्‌ नरतिसूत्रस्याष्टभिरित्यत्र परत्वात् अल्लोपे तन्ममित्यनेन बाधे सकृद्गतिन्यायेन पुनरप्रवृत्तेरव्य
र्थमेतत् नत्वष्टाभिरित्यत्र अल्लोपे तन्ममिति प्राप्नोति कार्यकालपक्षे नान्तत्वेन बहुत्वाभावात् अल्विधित्वे
न स्थानिवत्त्वाभावाच्चेति वाच्यं पुनः प्रसंगविज्ञानबोधनद्वारेण तद्विषये यथोद्देशपक्षस्यैवाश्रयणबोध
नद्वारा वा तद्विकल्पे तापकत्वमित्याद्युपायारित्यन्यत्र विस्तरः अष्टानामिति हलीत्युक्ते राटो नुट् तत आत्वे यत्नु
संनिपातपरिभाषया त्रनाम्‌ किं तु नोपधाया इति दीर्घे नलोपः अनोदात्तत्वं तु पूर्वत्रीत्येव सिद्धं नलोपे तु
न संनिपातपरिभाषा नलोपस्यासिद्धत्वादिति तत्र पूर्वत्र कर्तव्ये नलोपासिद्धत्वेपि तत्र कृते सिद्धत्वे मो
नाभावात् संनिपातस्याशास्त्रीयत्वेन तस्य नलोपासिद्धत्वे नालाभाच्च आरोपितासिद्धत्वेपि वस्तुतो नलो
पेन द्विघातस्य नायमानत्वेन नलोपेपि तस्याट्टवीरसौत्रं अत एव गणयितस्यासे संनिपातपरिभाषयापलो
पो न अन्यथा यस्य हल इति यलोपस्य बहिर्भूतत्वम् निमित्तत्वेन बरेह्यः तयान्तरङ्गवादेशं प्रत्यसिद्धत्वया
निमित्तविघाताभावः स्यादेवं तस्यान्नलोपस्यापि परिभाषा नित्यत्वे नैव साध्यतया तस्यासिद्धत्वात्
मेव युक्तं तदनित्यत्वेन ह्रीं चेवट् संनिपाते नमातस्य नुट् आत्वेन लोपे वानत द्विघातकत्वे स्थानिवद्भावेन रू

नचनलोपशास्त्रस्यासिद्धत्वात् संनिपातपरिभाषैवात्र प्रवर्तते इति चेन्न नलोपः सुपि तस्यासिद्धत्वात् ...
एकदेशविकृतन्यायेन ...
एवं तावद्वेद्यचित्संज्ञान्तरङ्गपरिभाषयैव अन्तरङ्गे कर्तव्ये ... असिद्धत्वं ...

राम
५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिनिमित्तानिमित्तकत्वेन आश्रितमितकत्वात्सूत्रे संज्ञा ...

नाहेपि षट्त्वसत्त्वात् कार्यकालपक्षे तत्तद्विध्येकवाक्यतापन्नषट्त्वस्य बहिरङ्गत्वपाऽऽह सैतेः नानत्वेन षट्त्वाभा
वान्नुट् न स्यादिति हलीत्यपकर्षः दीर्घग्रहणाज्ज्ञापकाद्वाकारान्तस्य षट्संज्ञाश्रयणे तत्पथोद्देशस्यैवाश्र
यणो नान्तरङ्गत्वात्पूर्वं षट्त्वे नान्तसंख्यावाचकसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यलब्धर्मत्वा
भावेन स्थानिवद्भावाद्वाकारान्ते आश्रयणे वा प्रतिपत्तिगौरवमिति बोध्यं वृत्त्याद्यनुसारेणाह गोणतेहि
त्यादि स्थानिवद्भावादिति पूर्वत्रासिद्धत्वेति तुतस्य दोषत्वनेन निषिद्धमिति भावः कार्यकालपक्षे त्वसा
दिनुप्राचामनुरोधेनेत्युक्तं प्राधान्यत्वेति बहुवचननिर्देशात् एवं च गोणीभ्यादेशप्रवृत्तौ तज्ज्ञाप्यैहम
ण्णो पि नेति भावः परेतु ... नेति सूत्रे भाष्ये अष्टानामित्येतत्सिद्धये हलीत्यपकर्षमुक्त्वा तत्रपक्षे प्रियाष्टौ
प्रियाष्टाः इति न सिध्यति प्रियाष्टानो प्रियाष्टान इति प्राप्नोतीति शंकिते यथालक्षणमप्रयुक्ते इति
समाहितं तत्र यथालक्षणमिति प्रतीकमुपादाय यस्य विशिष्टप्रयोगो न स्मर्यते नापि प्रयोगानिषे
धस्मृतिस्तत्र यथालक्षणमनुगंतव्यं तदत्र माभूदासमिस्यर्थ इत्येकमर्थमुक्त्वा नैव वा लक्षणमप्रयुक्ते व

संज्ञा कृदिदं गत्वा तद्व्यवस्था शिवकृदिदं गत्वा ...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ल॰बो॰॥
॥५६॥

नैते प्रयुक्तानामेव लक्षणतोऽन्वाख्यानादिति व्याख्यानुरूपमुक्तं, तन्नांसव्याख्यानमेव न्याय्यः अप्रयुक्ते ल
क्षणाभावस्येव योग्यतानतु लक्षणप्रवृत्तेरित्यर्थसंगतेः आद्यव्याख्यायाम प्रयुक्ते इति वाक्यशेषासंग
तिः प्रयुक्तेऽपि लक्षणानतिक्रमात् प्रयुक्तानामिदमन्वाख्यानमित्यन्यत्र भाष्ये ... किंच भाष्यकारस्य
लक्ष्यैकचक्षुष्कतया रूपमेव व्याख्यौचिता एकस्यैव प्रयोगस्य भाष्यपङ्क्तौ व्याख्यानभेदेन साधुत्वासा
धुत्वयोरनौचित्याच्च नवेतिसूत्रे भाष्ये पक्षभेदेनैकस्यैव साधुत्वासाधुत्वयोस्तिरस्काराच्च अत एव हल्ङ्या
दिसूत्रादावप्रयुक्ते लक्षणाभावस्यैव व्याख्याहेतुत्वात् कैयटेन नाम्रेडितस्येतिसूत्रेऽपि कैयटः प्रयोगमूल
लक्षणादस्य शास्त्रस्य प्रयोगाभावे न प्रवृत्तिरिति एवं चैषामनभिधानमेवोचितं अत एवाष्टाभ्य औशितिसूत्रे
भाष्ये विभाषा भाषायां यदयमात्वभूतस्य ग्रहणं करोति अष्टाभ्य इति अन्यथा अष्टन एव ब्रूयादित्युक्तं वैय
टरीत्या गोणे प्रवृत्त्यभावाय बहुवचननिर्देशस्यावश्यकतया तदसंगतिः स्पष्टैव एवं च तत्प्रयोगविचारः

नित्यमाम्रेडिते डाचि परे रूपं कर्तव्यं पटपटायति अकृतानुकरणाच्च अथवा अकारान्तमेतदनुकरणं भवेत् सिद्धं पदाश्रयात्तं
पदान्तस्य खल्वप्यच्छब्दात् तत्र तदा न सिध्यति विचित्रास्तद्धितवृत्तयः नानस्तद्धितअल्पघाते ४

॥राम॥
॥५६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वोपि निष्फल एवेत्याहुः निरुपपदादिति नुमोः समास एव विधानेन सोपपदे चोः कृ इति कृत्ते नैव सिद्धत्वेन
क्विनि क्विपि च विशेषाभावादिति भावः कृनोविति इदमुपलक्षणं उच्चारणार्थककारस्यापि ककारागुणप्रति
षेधाद्यर्थः नकारः क्विन्प्रत्ययस्य स्वत्र विशेषणार्थ इति भाष्ये स्पष्टं सन्निहितत्वेन तस्य लं तु त्तिगादीनां स
आभावः अतिङ् किं रुरुदिवेसादो नेदुशिक्षूतीति निषेधो माभूत् इति तावपदे न निर्वाहस्तु व्याख्यानाद्धहरकरण
मितिन्यायानेनु गृहीत इति सत्राशयः पुनेरउगिरयामित्यतः स्वर्वनामस्थाने इति नुमित्यतो नुमिति
चानुवर्तते क्विन्प्रत्ययग्रहणसामर्थ्यादेतत्कृतां संविज्ञानो न बहुव्रीहिः न च तदभावेनस्य कृत्सापत्तिः तथासति
क्विनोघः स्येवबदेत् न शोवेत्यत्र यथानुवृत्तावप्यदोषादिति बोध्यम् चोः कुः स्कोरित्यतोन्त इति सलोपसलीसतोसली
तिचानुवर्तते पदस्येति चाधिकारः कुत्सस्यासिद्धत्वादिति अत एव बहुव्रीह्याश्रयणात्प्राप्तिः सपुशिति सस्त्र
द्विषेति क्विप् धातुपाठेति व्याख्यानादिति भावः युजिति क्विसेति क्विप् इदे तिसजिरशोरिति सूत्रेरज्जुसृड्
भ्याशिति भाष्यप्रयोगात्काम्यच्सूत्रे भाष्ये उपसर्गात्काम्यतीति प्रयोगात् क्विन्प्रत्ययस्येति कुत्वं नेत्यर्थः परि
य मृडिति धातोरुच्यमाने कुत्वं नेतत्प्रयैरिति परिभाषयात्र सुप् निमित्तिका मृजेर्वृद्धिर्नं घि द्विर्मि तकारानुवृत्ति

317

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰कौ॰
११५८

व्य

ने चेतिनिषेधौ ॥ परोव्रजेः षिः चीस्पणादिपठितमितिमत्तेनतः क्विपूदीर्घोवनुवर्तेते व्याख्यानान्नाभ्यां ८
पदान्तरस्यस्यासंबंधः क्विनुषतो वेत्याह क्विविसादि विश्वस्य लोपइत्यतो दीर्घइतिवर्त्तते ननुषता
दीनामसिद्धत्वेनराट्शब्दपरत्वाभावात्तत्राह पदान्तेति तेनविश्वराजौ विश्वाद्दौ नविश्वाराउ्व्यामित्यत्रभव
ति आदिश्यविश्ववसुवरस्यत्रतुनदीर्घः नरेसंज्ञायामित्यतः संज्ञापदापकर्षणान् स्कोः स सलोपलोपः संयो
गान्तलोपइतिभाष्योक्तेरत्रझलिस्यस्यासंबंधः तेनसत्कप्रश्यो स्कोलोपइतिनार्थइत्यन्यत्र प्रपंचितं झली
त्यनुवर्तमानं सलादिप्रत्ययपरं संयोगसलीयत्रोदः स्थाहिश्रारंभेणलदर्थकृतयाधोऽधिकारात् तेनपृथ
स्फू तापयः स्थितिरि त्वाद्दौनदोषः सङीतिवार्तिकाच्चसनः सकारमारभ्य महिङोङः क्रारात्सङीतिप्रत्या
हारः भूपास्तापिसादौ व्यंजनपरस्येति न्यायेनलोपाभावेपिनक्षतिः ॥ कुचित्यप्रत्ययेसंयोगादिलोपप्रा
प्नियोग्यादाहरणानामनभिधानमेवोचितं स ङीतिवक्तव्यंकाष्ठशकु तेतिवार्तिकस्यप्रत्याख्यानपरता स्फा
स्फा काष्ठशगेवनास्तिकुतः काष्ठशर्क [illegible] नेतिभाष्येण तथैवबोधनादित्याहुः प्रत्याख्यानमेवकुदेश्युक्तिः सङी
तिवक्तव्यमितिपरे चोः कुः इत्यस्यत्वत्वेनापवादत्वाद्बाध्यते किं प्रत्ययेस्येस्यस्यतु क्विन्विधानसामर्थ्या

रुघ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

318

गृहीतोनेत्यस्य... पार्थक्ये... प्रक्रियादेतत्संगच्छते बलि युष्मान् अस्मान् युष्माकं ... अस्मभ्यं
... स्वाद्यर्थ ... इदं संगतमिति वत्सनन

देवन बाधस्याह क्विन्नन्तत्वादिति ऋत्विक्शब्दः यत्र संबंधिपुरुषविशेषेषु रूढः त्यदादीनामित्यनुवृत्तेराह त्य
दादीनामिति तेनान्तरङ्गत्वादौ न तदोः क्रियातो रितिनु नोक्तं अनेनैव त्यादौ न स्याप्यापत्तेः न चैतद्बहिर
ङ्गत्वान्नासिद्धत्वे बहिर्भूते सुनिमित्तकत्वेनास्यैव बहिरङ्गत्वात् इदं च तस्मान्नुड् चीति सूत्रे भाष्ये ध्वनितं सोऽपि
तौ अवसत्वेनेति गुणकार्यत्वादिति भावः ङे प्रथम युष्मदस्मद्भ्यां ङसोऽश् युष्मदस्मद्भ्याम् ... मिति
वर्तते ङे इति पृथक्पदं अलुप्तप्रथमयोरित्युच्यते ङयोः प्रथमयोः विभक्त्योर्वचनयोस्तु न ग्रहणं ... नेति
लिंगादिति भाष्यं संगच्छते त्वाहौ यद्यपि युष्मदस्मदादेशास्त्वमावेकवचन इति सिद्धः तथापि युष्मानतिक्रान्तोऽ
तित्व मित्यर्थमत्र विधानं न चैवं लक्षणस्य चारितार्थ्ये तत्वलेपरत्वात्त्वमाभ्यां भाव्यमिति वाच्यं त्वमावपि प्र
बाधन्ते पूर्वविप्रतिषेधात् तुरस्य वक्ष्यमाणत्वात् युष्मदस्मदोरनादेश इत्यतो युष्मदस्मदोरिति वर्तते शे
षे ... योः प्रागुक्तत्वेन तद्विषयातिरिक्तविभक्तिरिह शेषशब्दार्थस्तदाह ... स्पष्टं चे
दं युष्मदस्मद्भ्यां ङसोऽश् इत्यत्र प्रवृत्तसूत्रे च भाष्ये अलुप्तवसाम आकमिति ससुट्कनिर्देशः संगच्छते एवं चशो

शेषशब्दस्य ... कार्यत्वादेव   ... षष्ठ्या ...

319

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न० शे०
१५८

यत:

यदादीनामकारेण स्विद्भ्यां पुष्पा दस्मदोः शेषे लोपस्य त्वे पेन न्नायते प्राकृत त्वोरिति अविद्योत समस्तार्थं महाभाष्यानुरूप तं भु
वेत् टिलोपः हाव भावार्थः कर्तव्य इति तन्त्रस्य तेः अर्थं गाशेवस्थम्याशेषे लोपो विधीयते तो लुप्त शिष्टे हि तस्यात्: हा व्यं सिद्धिं प्रतीक्षिताः २

ननु भूरलोऽन्त्यस्येति यात्रवि

पघ्रहणं स्पष्टार्थं वि शेषविहिताभ्यां गासयुताभ्यां स्वविषये बाधसंभवात् अन्त्यस्येति अलोऽन्त्यपरिभाषयेति
भावः सौहार्दयोऽकारान्तादिति वृत्याद्यनुसारेण आह अतो गुणे इति यदादीनामिति सूत्रभाष्ये कैयटाभ्यां हले
न्तादेवादेश इति लभ्यते तेन दापुररूपस्य प्राप्तिरेव न यद्यपुज्ञारणार्थो नामपीसंज्ञालोपाभ्यां निवृत्तिः कार्या
तथाप्यतो गुणे इत्यस्याप्रवर्तनेन प्रक्रियालाघवमत्रपक्ष इत्संज्ञालोपयोस्तु सूत्र एव प्रवृत्तिरिति न प्रयोगसाधु
त्वसाने गौरवं सा हौसा वितिनिर्देशस्तु अवेतवहो यथाशासितिवत्तार्थसाधकः तिन्नन्ताक्षिपि पुषुआसिपति प्रा
तिपदिक योरादेश एव नेनितदाशयो मेपर्यन्तस्येति भाष्यसमतश्चायमर्थ इत्यनुपदं स्फुटीभविष्यतीति अन्तर
अनैमित्तिकत्वेन ङ्गः सादिति पार निमित्तानपेक्षत्वेन तत्त्वमिति भावः अलिङ्गे इति एवं च त्रिप्रामनयोरवृत्तेर्नैटाविति भावः इ
दसाम आकमित्यत्र भाष्ये स्पष्टं यद्वेति इदंत्यदादीनाम इति सूत्रभाष्ये स्पष्टं साम आकमित्यत्र च मपर्यन्ता
च्छेषस्येति इदमुपलक्षणं तेन त्वमित्यादौ लोपप्रवृत्तिवेलायां मपर्यन्ताच्छेषत्वाभावेऽपि न क्षतिः ननु अद
न्तस्य आदेशानां वाणीदाङ्गमिति परिभाषया पररूपात्पूर्वमेव टिलोपे टावभाव उपपादयितुमशक्यः अकार

राम
५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यकार्ये हूये पि स्थानित्वेन समानस्थानिकस्य प्रसक्तीति चेन्न हलन्ता एवादेशा इति कैयटेनात्रैवोक्तत्वेना
दोषात् शेषरस्य सामर्थ्यान्नन्याया प्रवृत्तिरित्यन्ये तन्न युष्माभ्यं युष्मान् युष्माकमित्यादौ टाप्प्रवृत्त्या
चारितार्थ्यात् तस्माद् निरासात् तदप्रवृत्तिरित्येवं तदाह अतो गुणे रन्तेरिति अत्र वदन्ति तन्नद्भाष्यप्रा
भाण्याच्छेषग्रहणस्य सुद्भ निर्देशाभ्यां वास्य सूत्रस्य वृत्तार्थरूपतास्पष्टं तच्च लक्ष्यानुरोधाद्बोध्यं शिष्ट
तं तेन भ्यसि टिलोपे युष्मभ्यमिति न अत एव भ्यसोभ्यमिति सूत्रे यदि भ्यमादेशः शेषे लोपो स्यलोपप्र
त्तिः संप्राप्नोति अथाभ्यमादेशः शेषे लोपष्टिलोपप्रसक्तस्योदात्तनिवृत्तिस्वरः प्राप्नोतीति पठ्येऽसि
न्तथा स्तु इत्येवोक्तं न तु भ्यमादेशे टिलोपमादाय फलभेदउक्तः न स्तुतस्तु टिलोपो व्यर्थः अत एव लिंगाभा
वादिटिलोपवचनानर्थक्यमिति साम्यमभावमित्यत्र भाष्ये उक्तं अत्र लिंगाभावादिस्तूपलक्षणं शिशीलुङ्
नुम्विधिभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेनेति तेन राच्छंदसीति सूत्रस्थ भाष्यवार्त्तिकबलेन
लिंगबलेऽपि सन्निपातपरिभाषया टाबभावस्योपपादयितुं शक्यत्वमत एव सन्निपातपरिभाषया वृद्धा
विरित्यत्र टाबभावः स्पष्टं तत्सूत्रे भाष्ये उक्तः शेषग्रहणं च भाष्ये प्रत्याख्यातमेव त्यदादीनामः इति सूत्रस्थ

321

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओं.श्री.
११५८ ॥

श्री

रिलोपषष्ठाबभावार्थ इति तु वार्त्तिके द्वेश्चिवचनमिति न दोषः एतच्च भाष्यप्रदीपोद्योते निरूपितं अभ्य
स्तत्रे पथ्येछसि तथा रिहतिश्रो छोः स्पाभ्यमिति छेदस्य प्रौढिवादत्वं भगवतैव सूचितं पथ्येछसि
तथा सतु तत्र दोषो ह्रारोमध्या सुकूर इति तत्तात्पर्यात् अभ्यमिस्येव लुछदोन्यायः अत एव युष्मदस्मदो
रनादेश इति सूत्रे न चादेशो हलादिरस्तीति भाष्योक्तिः संगछत इति परमसखिति आह लोपेऽदन्तावि
धिरिति भावः गोत्वप्रवृत्तौ बीजाभावादाह तिसमिति युवावौ द्विवचनशब्दोत्र यौगिको व्याख्या
नात् द्वयोर्वचनं बोधनं तत्र समर्थयोर्युष्मदस्मदोरित्यर्थो भाष्ये प्रामाण्याच्च तद्वक्ष्यमाणयु
ष्मदस्मदोरेव विशेषणात् न तदन्तस्यागाधिकाराद्धि तदन्तग्रहणमिस्याशयेनाह द्वयोरुक्तावि
अतियुष्मां अत्यस्मामित्यादौ । ति एतत्सकलं गोतोदाहरणेषु मूलएव स्फुट मपर्ययतस्य किमिति अत्राधिकारसूत्रे कृमर्थमि
स्यर्थः ननु समुदायादेशाशे ष्योकारसकार भकारादौ सुपि सर्वनाम्नः षेः प्रागकजन्यत्र तु सुबं
तस्य टेः प्रागिति व्यवस्थापायुष्मदस्माद्विषयेत वै यस्यादि सिद्धये वक्ष्यमाणासादन्तरंगत्वाद्घु

अतिपुरा
कृअस्याबा
रू६

राम
५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाभिप्रेतस्तस्थित्युत्तरमवकल्पितिपूर्वकामित्यत्र न दोषो तआह त्व्येति नन्वत्रापच्येइति न्यासे नैकारादेशो
पसिद्धिरत आह पूर्वकाम्याभिमिति हलंत आदेशा इति पक्षे तुल्ययेस्यादेरसिद्धिरेव मादेशस्य सवो
देशत्वं च न स्यादिति बोध्यम् नन्वेवमपि मांतस्यैत्वे वोच्यतो किंपरिग्रहतो नेति चेन्न पुष्मुपत्या
देः क्विपि सुप्यादेशाभावार्थं तत्सत्वात्सूर्ये तशाद्दैनमान्तापेक्षया उभयस्य लाभात् कृदिपर्यंतवास मि
रस्युक्तेऽग्रे किंचिदस्तीति नियमेन प्रतीतेः ॥ एवं च मान्ताद्यशाग्रे विंदव शिण्तत्रैव पुष्पादस्मादेशा
देशाः अतएव भाष्ये वाधिद्योतनार्थपरिग्रहणं कृतं युष्मान्तस्येत्युच्यमानेऽपि तत्रैव मान्ते पुष्मदस्मदी
तत्रैवादेशास्युष्मच्यमान्ते युष्मायतेरस्मायतेश्चाप्रत्यये इति उक्तं अवधिद्योतनार्थमित्यस्यान्तशब्दस्यावधि
वाचकताद्योतनार्थमित्यर्थः पूर्वान्तशब्दस्य लोके तथैव प्रयोगात् अनेन किंचित्सते देशकालयोरवधिसं
व्यवहारस्य लोके दर्शनाद्यत्रैवेत्यस्यानिष्टएवेत्यर्थः परिग्रहणाभावे तु यतः पूर्वोऽस्ति परतस्तु नास्ति
सोऽस्य इति भाष्योक्तेर्मान्तपदस्य मुख्यार्थलाभायात्रैव स्यात् कोलुप्तमित्यस्य प्रवृत्तिश्च स्यात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ल॰ शे॰॥
५६०॥

अभिव्यक्तपदार्था इतिन्यायश्च पदकार्यविषय इति तदाशयः अतएव भाष्ये प्रयोगप्रदर्शनं न कृतं प
नुपरिग्रहणाभावे मान्तेयत्नेत तत्रैव स्यात्सामानाधिकरण्येनान्वयस्यापि सत्त्वात् तस्मिन् सामर्थ्या
घुषादस्मादो यौमपर्यन्ताविति व्याख्यानाल्दान्ते व्यपदेशिवद्भावेन पुष्पायसादेः क्विपि च सिध्यति
ध्यपेदोह्रिवद्भावोऽप्राप्तिर्न दिवे नेति नुप्रसक्तविधिविषयमिति तन्न परिग्रहणास्यैव वैयधिक
रण्येनान्वये मतिमंत्रादिन्यायेन निर्धामसंकल्पनापेक्षयान स्यैव न्याय्यत्वात् तन्न हि सामा
नाधिकरण्यासंभवाद्वैयधिकरण्यान्वयप्रसज्येत किंचात्र व्याख्याने वधिद्योतनार्थमिति भा
ष्याक्षरास्वारस्यमपर्यन्तस्येति वचनमुणसंवितानो बहुव्रीहिरिति दिक् अगगायेरति अगाधिका
रस्यैवेत्यर्थः मकारान्तरमिति शासोनेस्यनेन संहितया पाठ इति शेषः परेनुशेषविभक्तिभूतामा
रिपुषादादिसंनिपातेन जातस्य लोपस्य तद्विघातकत्वादि निमित्तसं नेति संनिपातपरिभाषयेव
इत्याद्यभावः सुटस्त्वाक्मवयवत्वान्नतेन संनिपातविघात इति ससकारानिर्देशः सामप्रादिष्वित्यत्र॥

॥राम॥
॥६०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत एव स्त्रीग्रहणं सूत्रे ह्रस्वत्वं तु ग्विधेग्रामणि कुलमिति संनिपातपरिभाषाप्रयोजनं व्याख्यानं सरेय
दान्ह्रस्वमात्रस्य नुगागमेन तदन्तस्य तदेदंप्रयोजनमिति व्याख्यातं कैयटेन मूलोक्तं तु नपुंसकभाष्यो
नुक्तेः अत एव तेनेश छंदसीति सूत्रे नपुंसकादेशो व्ययुष्मदस्मदोर्विभक्त्यादेशादिप्रतिषेधेनेति वार्तिकं
व्याख्यापतेषु कृतेषु पुनः प्रसंगाच्छीलुग्विधयः कस्मान्न भवति स्यकू इति न्यायादिस्युक्ते तद्वीयापुनः
प्रसंगस्येवाभावेन तदसंगतिः स्पष्टैव अत एव च तत्र युष्मदादेर्विभक्त्यादेशस्य पूर्वं ब्राह्मणता इत्याद्यर्थवेका
शास्त्रदर्शनं कृतं अन्यथा तेन्नापि जसः शीप्राप्यात तदसंगतिः युष्मिस्त्वादिप्रयोगकरणेन तत्रइत्यादिसंप्रास
माधानावरणेन च भाष्यकृताव संनिपातपरिभाषाविषये संसूचितं भुंगा च तत्परिभाषया वारणमपि चि
त्वं तु स्याअद्रुः सबधिकार्यविषयत्वात् सत्रभाष्यस्वरसोप्ययमेव वस्तुतो न बालस्य संस्कारिकाद्भूपोरित्यादि
निर्दिष्टासंगतेः अत एव भाष्ये विसेतस्याज्ञापने प्रयोजनमिति प्रश्नेपि वै गुणप्रतिषेधो न वक्तव्य इत्येव प्रयोजने
मुक्तं न तु प्रयोगसिद्धिः प्रयोजनमित्याहुः तथा विति अत्रावि विभक्ताविति संबध्यते अन्यथा प्रसयोत्तरपदयो
थेति व्यर्थं स्यात् नस्कलेन तत्सुंदरः पुत्रो यस्य पुष्पात् सुन्दरपुत्र इति त्रिपदबहुव्रीहौ नादेश इति भत्रे कृचन शब्दो व

मुकु

325

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
१६१

दौ

योगिको व्याख्यानात् न दाहेकस्येति अविभक्तिकमिति व्याख्यानात् यो ः चिभनादेशा इति किं सतुमतु
पुन्न्म्या अरिदृत्य [illegible] देशः आसविधायके चन्म्यमूल्यावृत्सेः वस्तुतस्तु तत्रार्थमेव तदन्य मित्येव छंदादि
ति भाष्ये स्पष्टं हलोविति परिशेषलब्धं तद्लीत्यनुवृत्तौ तु यो चीस्यज्ञव हत्तामास्तु व्यसोऽम्य अत्र यद्
त्रव्यं तद्नु नं पक्षद्वये पा तिलत्रोस्य लोपे द्वयोरकारयोः पररूपे एकादेश उदात्ते नेत्यम्यमः आद्याकार उदा
त्तः शिलोपेपि यत्रानुदात्ते वर्णौ परे उदात्तो लुप्यते स वर्णो उदात्त इत्यर्थके नानुदात्तस्य च यत्रेसनेन स उदा
त्त एवेति न विशेष इति भावः नन्वाकमः पूर्वलोपाभावेनादं तत्ताभावात् स्थाग मा प्रसक्तेः सस्युङ् नि
र्देशो व्यर्थः सूत्रासंगतिश्चेत्यत आह भाविन इति भाकमिशो बेलोपे कृते श्राम स्येत्यर्थः अयं भावः सामः
प्रसंगे भाकमित्यनेन सुगामोरत्व विषये स्यन्नम प्रयोगो बोध्यते स्थान्यादेश भाव विषये सर्वत्रैवमेव
यथाद्वेधातुक विषये स्तर प्रयोगो भूप्रयोगश्चालेभूरित्यनेन प्रतिपाद्यते न तु सतो निवृत्ति शाश्वानित्यस
प्रसंगात् किंतु प्रसक्त वुद्धेरेव निवृत्तिः सकार बुद्धि प्रसक्तेश्च प्रवृत्ते सांप्रतिक्या असंभवाशंविन्यागम

राम
६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णं स्वकारोच्चारणसामर्थ्यादिति प्रथमप्रवृत्तस्यैव सुटो निवृत्तिर्न तु प्रवृत्त्यन्तरकल्पन इति भाष्ये स्पष्टं न च निवृत्तिश्चा
मोऽभावात् अत्र सामस्थानिनोऽन्यास्था निवृत्तेन सामुत्वमेव न साम्प्रउत्तरीत्या च नस्था निवद्भावप्रसक्तिः
सैवाप्रसक्तिः ससुड्निर्देशेन बाध्यते इति बोध्य अत एवातिलाकमिस्यादौ प्रत्ययोत्तरयोरिति भाष्योदाहृते
आकमुड्भावो सिद्धो भाष्येव साम्प्रस्याहापारोपेणादेशः। आदेशस्याम्भाभावाच्चात्र न नुट् न च यत्र सा
म्भावीन तैवा यं सामुभाविहास्य सर्वथादुरूपादतासाम्प्रस्याशास्त्रीयहेनातिदेशालभ्यसादिति भाष्य
विरुद्धकल्पनाव्यर्थेति दिक् ह्रस्वादिरकम्नुनकूतः अत्यल्पोऽप्यकारस्यैतनिवृत्तसाधारितार्थ्येपत्नोयुष्मकमि न्यपररूपा
स्यसिध्यापत्तेः द्विवचने कवचेन शाद्धयोरर्थपरतया व्याख्याने पूर्वं दर्शयति द्वयोरकतेति द्विसैकस विशिष्टवा
चिनीत्यर्थः समासार्थो मुख्यं विशेष्यं अन्यसंख्यः पुष्माद्यर्थगतसंख्येतरसंख्यापुत्रश्चेदित्यर्थः स्त्रद्वाति
अर्थपरत्वाश्रयणादिति भावः एते इति कर्तृपदं युवावाभाविति कर्मपदं एवं समासेऽपि पूर्वविप्रतिषेधत
इति विप्रतिषेधे पूर्वं शास्त्रसुप्सुपेति समासः अत एव प्रत्ययोत्तरपदयोश्चेति सूत्रभाष्ये त्वमावितिसूत्रे शेष इ
त्यनुवर्त्य सजसङे उ. स्थ्यति रिक्त विभक्तावेताविति व्याख्यातं त्वमोनवृत्तिः अर्थपरसाभ्रयणादेवेति भावः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥न०शे०॥
१६२०

इति विग्रहे इति एवं विग्रहे याहग्रूपातिता निवर्त्स्यं तरति शेषः अतिसारमिति अत्र यथा कूत्रउभावो तथोक्तं ।
पदस्य अपदान्तस्य मूर्द्धन्य इत्यतः प्रागयमधिकारः तत्फलं तु राज्ञा ना विसादौ न लोपाभावः इयं क्वचित्स्था
नषष्ठी क्वचिदवयवषष्ठी होढ इत्यादावाद्या मादुपधाया इत्यादावन्त्या तेन वृक्षवन्ता विसादौ वत्ससिद्धिः अन्यथा
मसेतं पदाभावान्न स्यात् अतएव नलोप इति सूत्रेन्तग्रहणं चरितार्थमिति स्पष्टं भाष्ये १ संख्यापाद
स त्यत्र नलोपाभावस्तु सत्संज्ञे इराङी त्यत्र नश्वाभाववद्ध्येयः पदात् कुत्सने च सुपीत्यतः प्रागयमधि
कारः अनुदात्तं सर्वमित्यादिपदत्रयमपादसमाप्तेः सर्वग्रहणं तु तिङ् तिङः इत्यादौ सर्वानुदात्तत्वस्य
विनिगमनाविरहाल्लाभेपि स्पष्टत्वयात तल्लाभार्थमित्याचार्येः स्पष्टं आदेः परस्याजोन्त्यस्येत्यनयोस्तु
न प्राप्तिः पदस्येत्यस्यानुदात्तं तिङ् इत्यादिश्रुत प्रथमान्तानुरोधेन प्रथमया विपरिणामेन स्थाने ष
ष्ठ्याभावात् तत्र पादशब्देन ऋक्पादः श्लोकपादस्याविशेषात् गृह्यते अपदादिशब्देन पादादिशब्देन
पादान्तपादमध्यस्थस्य तु छन्दोहीनवाक्यस्थस्यापि ग्रहणं ग्रामे वृक्षस्तोमे स्वमिति भाष्यात् ॥
षष्ठ्यादीति सर्वस्य पदस्येत्ययमप्यधिकारसामर्थ्यादिदं लभ्यते इत्यन्यत्र विस्तरः तौ चानुदात्ताविति ॥

॥साम॥
॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुदात्तत्वगुणविशिष्टयोर्विधानादितिभावः उक्तविधयोरिति पदात्परयोरपादादौ स्थितयोरित्य
र्थः द्वितीयायामामयोरपवादत्वादाह षष्ठीचतुर्थीति विभक्तिद्वयमात्रस्य द्वितीयादिक्रमतोदाहरति
श्रीशइति इत्यादित्यनेन चतुर्थ्यन्तत्वस्फुटीकृत सवेधोस्मानिति नन्वत्रसध्यभावेनु वाक्षरत्वेनानुष्ट
प्पारहानापत्तिः संधौ तु उभयत आश्रयणेनादिवत्वाभावेन कथमादेशप्राप्तिरिति चेन्न सवेधोरस्यैका
देशविशिष्टस्य पूर्वान्तत्वेन पदत्वात् स्मानित्यस्य चैकदेशविकृतन्यायेन द्वितीयान्तास्मच्छब्दत्वेन तस्या
प्तिरित्याशयात् संधिभ्यान्तरङ्गत्वादादेशात्पूर्वमेव आदेशोस्तितनः रूपमः सवदाः वाक्षिलिपादादिसा
पस्योपजीव्यविरोधाभावादेशइत्यन्ये उभयत आश्रयणेऽपि तस्य स्वीकारे इ[illegible]ण धातोनिरूपपिष्या ति
मइतिपरे ननु तरीसाबष्ठ्याद्यन्तानामेवादेशाभविष्यन्ति किंस्थग्रहणेनातआह स्थेति अहानोस्थ
शद्वइतिभावः युष्मास्वत्रइति युवयोर्युष्माकं वायुत्रइत्यर्थः यद्यपिवृत्तौ संख्याविशेषानवगमइतिभा
ष्येस्पष्टं तथापिसंबोध्यत्वे नैवानेकव्यक्त्यवगतिर्न तु द्वित्वादेर्भानं नाप्येवंतस्येतिसमोनवतोविग्रहेतुसं
ख्याविशेषभानात् द्विवचनादिभवत्येव तस्यलुक्यपि प्रत्ययलक्षणेन द्विवचनाद्यन्तत्वं भवत एवबध्वोर
तमर्थिएनः फलमत्तस्यआभीयात्प्रयतइत्यादेर्वार्णाघ्रणिभाषयाचःतास्वत्रइत्यत्र नुविग्रहेबाक्यीयैकस्यारोपाद्यारूपप्रवृत्तिर्याद्वंनत्वद्वोपदातिनविरोधः२
धरस्मिाप्रतिस्थानिवत्तेनवसिद्धेन्दसाउभयतआश्रयणेनान्तादिवद्भिसस्याएकदेशयुक्तिसंस्थापिनंघकिंतुनत्रव्यपवर्गेत्वसानंगीकारात्सकोदर्भिरणमुर
विभिासंधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गारं च धुगारमपि इति प्रगृह्यसंज्ञासूत्रे भाष्ये प्रयुक्तं । तच्च नद्यविषयसूत्रप्रत्युदाहरणलाभायेति
स्य सूत्रे इति न प्रत्युदाहृतं तत्समानवाक्ये इति निमित्तनिमित्तिनोरेकवाक्यस्थत्वे इत्यर्थकं समानवाक्य
इति प्रत्ययस्य विधेयाद्यर्थः । निघातो नामानुदात्तः एकतिङिति बहुव्रीहिरेकतिङ् न घटितमित्य
र्थः तेन पचतीत्येतन्मात्रस्य न वाक्यत्वम् इदं च शास्त्रकार्योपयोग्येकवाक्यत्वलक्षणं तेन पच्यस्व गो
धावतीत्यादौ लौकिकैकवाक्यत्वेऽपि नाख्यातिः समर्थसूत्रे भाष्ये स्पष्टमेतत् अत एव तिङ् तिङन्त
स्य चैतदाश्रित्याख्यातिङ् इति प्रत्याख्यातं भाष्ये लौकिकवाक्यत्वे च सुप्तिङन्तचयो वाक्यं क्रियाकारका
न्वितत्वपरे तेन तद्वा शब्दश्चेदर्थे कारकान्वितक्रियान्वेद्बोध्येति शेषः । तेन निरर्थकशब्दसमुदायव्या
वृत्तिः सुप्घटितिङन्तचयः सुप्तिङन्तसुपविशिष्टतिङन्तं तेषामेकशेषस्तेन कारकान्वितक्रियाबोध
कं च पतिङन्तचयः सुप्तिङन्तचयोर्णातन्त्रयाणामपि वाक्यत्वलाभः तत्र सुबन्तचयो देवदत्तेन रा
धितव्य द्वितीयं पचति भवतीत्यादि तृतीयं चैत्रः पचतीत्यादि ओदनं पचेत्यादि समर्थपरिभाषा
[illegible] तिङ् तिङ् इति [illegible] अभिप्रेतं वाक्यलक्षणं आख्यातं [illegible]
[illegible] समानवाक्यस्थत्वसिद्धिः [illegible] एतदेव [illegible] भाष्ये [illegible]
[illegible] परिभाषेत्यलक्षणमेकतिङ् वाक्यमित्युक्तं [illegible]

रा. म
६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

330

त्यत्र न प्रवर्त्तते एकार्थीभावविषये एव तत्प्रवृत्तेरिति भावः एतेषां नानावादय इति इदं च सपूर्वाया इत्यत्र भाष्ये
स्पष्टं नुचवा वादयः समुच्चयविकल्पाद्युत खेदावधारणार्थास्तेषामन्यतमेन योग इत्यर्थः तृतीयानिर्द्दे
नैव सिद्धे पुनः ग्रहणं व्यर्थमत आह पुनर्ग्रहणादिति साक्षादिति युष्मदस्मदर्थगतसमुच्चयादिद्योतकत्वे
इत्यर्थः परंपरेति स्वार्थाश्रयान्वयान्वयित्वादिरूपेत्यर्थः चेत्तसेति अनालोचनार्थे इत्येव पर्युदासेन
३पा सिद्धे पर्युदासेन दिंद्रियजन्यसकलज्ञानसंग्रहार्थमिति भावः परंपरेति स्वान्वितान्वयित्वादिरूपेत्यर्थः
तदुक्तं भाष्ये पश्यार्थैश्चाप्रतिषेधः समानवाक्य इति प्रकृत्य वक्तव्यः इतरथा हि यत्रैव पश्यार्था न युष्मदस्म
दी साधनं तत्र प्रतिषेधः स्यात् ग्रामस्त्वा संप्रेक्ष्य गत इति इह न स्यात् ग्रामस्तव स्वं संप्रेक्ष्य गत इति समान
वाक्ये इति निवर्त्तनेन समानवाक्ये पश्यार्थे युक्ते युक्ते युक्ते च युष्मदाद्यर्थे आदेशप्रतिषेध इति कैयटः एवं च न च
वेति सूत्रे पुनर्ग्रहणं स्पष्टमेव तदभावेपि प्रकृतसूत्रस्यैव तस्यापि साक्षात्संबंध एव प्रवृत्तिः स्यात् समान
वाक्ये इत्येतत्संबंधात्तु अस्य पुनर्युक्तेपि प्रवृत्तिरित्यन्यत् अत एव देवदत्तस्य पुत्रात् यज्ञदत्तः पृथगित्यादौ दे
वदत्तशब्दात्त पंचमीत्याहुः भक्तस्तवेति इह तवेत्यस्य रूपेण संबंधो न तु साक्षाद्घायतिनेति भावः सपूर्वायाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ल॰ हौ॰॥
॥६४॥

हशद्वौ विद्यमानवाची अवधेरपि संबंधित्वेन विवक्षायां षष्ठ्यर्थे न्यपदार्थे नेकमिति समासो गौणोपसर्जन
स्येति सः। तदाह विद्यमानपूर्वादिति प्रत्ययग्रहणे तदन्तग्रहणमित्याह प्रथमान्तादिति न चैतेवाना
वाद्यपद्यत्यन्ते नैव विकल्पसिद्धेः किमनेनेत्यत आह नाद्वेहोपीति अत्र नेति निवृत्तं तदाहाद्दे शावेति ते
नेति मन्त्वने नेत्यर्थः प्रकृतार्थोत्वाद् अपच्छद्वौ पादानापेक्षेति भावः स्यष्टं चेदं ससमोल्लासे कोण्य प्रका
शादौ अत्र हरिस्त्वामित्येवमुदाहरणे समासमित्यपरज्ञायते इत्यस्य च मध्यमणिन्यायात्त्रेणोभयत्रान्व
यः नस्तद्रस्यापि समानवाक्यस्थेन विद्यमानपूर्वत्वं बोध्यं सामन्त्रितं संबोधने चेत्यतः संबोधने इ
ति वर्त्तते सेत्यनेन प्रथमा परामृश्यते आमन्त्रणमामन्त्रितमिति महासंज्ञाकरणात्तदन्तविधिरित्याह।
तदन्तमिति अत एव हे हे भोर इत्यादीनामपि संज्ञासिद्धिः अन्यथानर्थकानपीति न्यायेन पूर्वविभक्तिलु
कि प्रथमाया अभावेन नस्वनिर्भिन्नत्वे समावत्वदत्र संज्ञा न स्यात् यद्यप्येषां संबोधने इत्यतः प्रातिप
दिकार्थसूत्रे सा च प्रथमा तथापि संबोधनविषयप्रथमासंज्ञान्न दोषः एतदर्थमेव प्रथमेत्यनुवर्त्तमाने
सेतिपदं अन्ये तु संबोधने चेत्यस्य तत्र वर्त्तमानादित्यर्थे अन्ये त्वत्रापि संबोधने चेत्येव प्रथमा प्रातिप

आमन्त्रस्य स
माऽभिस्व आन्वयेन

येन

॥राम॥
॥६४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्यमायां भाष्य
देवाभावात्

रिकोक्तस्याख्यावर्तकत्वेन विभक्त्यप्रतिबंधकत्वात् तिङः सुबन्तद्धितसमासैरिति परिगणनाच्च सेति नु
विधेयसमर्पिकाया अनुवाद्यतायस्य ष्टार्थमित्याहुः अविद्यमानवदिति गोतो णिदिति वत्सिद्धे वक्तरेता
मतिदिश्यमानविरुद्धस्वाश्रयस्यापि लाभार्थं तेनामुभौ देवदत्तेस्यारावामपाकान्तरस्मामंत्रितमनान्तिक
इति एकान्तरस्य प्रयुक्तामंत्रितनिघातनिषेधसिद्धिरिति स्पष्टं भाष्ये नचात्र नामंत्रिते समानाधिकरणे इ
त्यनेन निषेधादविद्यमानवत्त्वमेव नेति वाच्यं अस्य संबोधनमात्रद्योतकत्वेन विशेष्यवचनत्वाभावात् देव
दत्तस्येव विशेष्यत्वाच्च इहेति अग्नेतवदेवास्मानित्यत्रादेशा अग्नेनपेस्यत्र तिङ्ङतिङः इति निघातः अग्नेर
न्द्रेसत्रामंत्रितस्य चेति निघात इति विवेकः अत्र पूर्वमित्यनेन परस्याक्षेपात् पूर्वं परस्य कार्ये ऽविद्यमान
वदित्यर्थस्तेन देवास्मानित्यत्र देवेस्तस्यामंत्रिताद्युदात्तत्वं भवत्येव पूर्वं किंपादिह देवात्रामंत्रितनिघातोभ
वस्येव प्राचीनमिति तावमेवलक्ष्मीपते ते ऽप्रियुगं स्मरामीत्यादि सिद्धिः नृसिंहाश्रयमतेरख्यातिरित्यादौ
गेयेकेन विनीतो वामित्यादाविव विभक्त्यन्तप्रतिरूपकनिपाताङ्गीकारेण दोषः अयं समाधिः प्रयुक्तेपिन
इत्यस्य विभक्तिप्रतिरूपकत्वात् अन्यार्थं नु मूलोल्लूककल्पनावश्यकत्वेन दाहेवमिति सर्वेषां निघात इति अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०कौ०
॥६५॥

स्यश्चाम इति शेषस्तत्र्यमुत्ते सरस्वती स्यनयोर्बाधकाभावाद्वृत्तौ भृतुद्दीपस्यनुनपादादिस्थानात् एतेनादिस्य:
सर्वेषामिति च बहुवचनमसंगतमित्यपास्तं अन्नेतेन खमिति अनुदात्तं सर्वमित्यनयोः संबधानर्हत्वेन
निवृत्त्यासाहचर्येणापदादावित्यस्याप्यविद्यमानवत्सूत्रे निवृत्तिरिति भावः आमंत्रिते किं देवकुरोषि सा
मान्यवचनं किं अग्ने देवि सरस्वति ईडे कूत्ये इसाद्धे पर्यायेषु परेषु निषेधो माभूत् सामानाधिकरण्यं चैकार्थ विशे
त ष्यकबोधजनकत्वमेव न तु प्रवृत्तिनिमित्तभेदगर्भमिति दिक् सुपादिति शोभनौ पादावस्येति बहुव्रीहिः संख्या
सुपूर्वस्येत्यकारलोपः समासान्तः अंचेः सुपीति निपातनैः साहचर्यादिति भावः अनिदितां इत्यसंहैकारव च
द्भिन्नानामित्यर्थः अंगस्येत्यधिकारः अंचतेर्भस्येति अल्लोपो नु इति वदस्यापि प्रत्यंच पंचति इति प्रत्यकलेन
प्रत्यङ्ङेसादेः पूर्वाकारेन प्रवृत्तिः अचस्तस्मैनेलुप्तनस्य ग्रहणं व्याख्यानात् । अस्यापि किं प्रत्यचौ लुप्तनस्येति विपु
जायां प्रत्यङ्ङ्सा चौ नेदं वर्गग्रहणं व्याख्यानात् तदाहलुमस्यादि । अण इति वृत्तौ चईस्यादीनामनभिधानामि
ति भावः । एवं चाण्ग्रहणमुत्तरत्र प्रसंसारणस्येत्यत्र तृतीयास्येत छ्वावस्यर्थमावश्यकमिहापि संबध्यतेन
सत्रास्य व्यर्थत्वमस्ति इत्याकरे स्पष्टं अभ्यतेतिं तत्परिभाषाभावे तु चोपस्यंगस्य प्रतिषेधोवक्तव्य इति वचनमेव

अपातोरि
ति सूत्रारंभ
सामर्थ्यादि
ति भावः

चोः कुरि
त्यनेनेति
नैहादिति
भावः २

राम
६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

334

प

भाष्योक्तं हारतां विग्रहे । चाद्या सर्वनाम्न इत्यतः सर्वनाम्न इत्याहृष्य तेसामर्थ्याद् ईसर्जने प्रवृत्तिः अप्रत्यय इति
पाठेऽविद्यमानः प्रत्ययः क्विबादिरित्यर्थः । व प्रत्यय इति पाठे प्यकारस्याविवक्षितत्वात् स एवार्थः अद्व्यादेश
स्वध्यादेशावतो दात्तौ निपातनादिति स्पष्टं भाष्ये अदसो भूसेरितीकार उच्चारणार्थः अदस इत्यव पंचषष्ठी
सम्नहं तत्स्था निश्चौकाररेफयोरप्युपलक्षणात्तेनादस्याति अदो न्याद इत्यादौ न दोषः दादिति किं अमुया इत्यत्रा
न्यस्यमाभूदिति समाहारद्वंद्व इति इदमर्वाचामनुरोधेन वस्तुतोऽपुंत्वमेतत् उस् ऊस् इति द्वंद्वे सुलोपे घ्यन्त
त्वाद्ध्रस्वस्य पूर्वनिपाते नपुंसकह्रस्वसवर्णदीर्घयोः प्राप्तयोर्दीर्घस्य शास्त्रान्तरप्राप्त्याऽनित्यत्वेन नित्यत्वाद्
परनिमित्तकत्वेनान्तरंगत्वाच्च ह्रस्वत्वे ततः सवर्णदीर्घे उ इति रूपासिद्धेः रत एवोकार इत्यत्र उकाल इति न ह्रस्वतो
तस्माद् इव उतत्र लुउ दिति च परत्वेन भाव्यमानोकारस्य सवर्णग्राहकत्वो त्सिद्धमिति बोध्यं ब्युडः संप्रसार
ताम् इति सूत्रे भाष्ये नन्त्यविकारे न्त्यसदेशस्येति परिभाषा पठिता न्त्यसदेशानंत्यसदेशयोरेकप्रयोगे युग
पत् प्राप्ताभावत्यसदेशस्यैवेति तदर्थः अनन्त्यविकार इति लिंगं तनामर्थ ततः पठति अंत्यबाधे इति अन्त्यस्य बाधेका
र्पाप्राभावर्थादनेकानन्त्यस्य प्राप्ताभाविस्यर्थः अन्यथा नोतो इत्यादिने सोदावेव स्यान्न तु न मती स्याद्विति भा

न

मै

335

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰ शे॰
।६६।।

ष्ठेस्य षष्ठं अल्लोपोनोऽचः सांस्योतेदाचनेवृक्वि ष्ठ एवत्वनापेक्षयेयं न्याय्याकिंच भसंज्ञायां कार्यकालपक्षाश्रयणा
मशाकंच पूर्वत्रैनपदसंज्ञाबाधकत्वानुपपत्तेः राजद्रस्यादौ नलोपस्यासिद्धत्वात्पूर्वमल्लोपोन इति लोपे पश्चा
आमनलोपेकृवाक्यतापन्नपदत्वस्येतदेकवाक्यतापन्नभत्वेन बाधायोगान्नलोपापत्तेश्च तस्मादाकडार
सूत्रसंज्ञासु यथोद्देशपक्ष्याश्रयणमेवावश्यकमिति यजादिस्वादिपरोक्ष्योर्निर्णयस्य न तत्र लाभः ष्यङः संप्रसा
रणमिति सूत्रस्थ कार्यकालसंज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति यचि भमिति तत्र यजादिपरतया नु
कारं विशेषयिष्यामः अनाकारमिति भाष्यं तेनैकदेशयुक्तिः यजादिप्रत्ययपरस्यांगांशेऽन्वितात्कांक्षतया तेनानो
विशेषणायोगाच्च ।। अतएव सर्वपूर्णानामन्यूथासिद्धिं प्रदर्श्यापितस्माद्याद्यन्यतरस्याः परिभाषा
याः प्रयोजनानितदर्थमेषाकर्तव्येति उपसंहृतं भाष्ये इति भावः भन्यसरेहास्येति अंत्येन समा
नोद्देशीयस्येत्यर्थः तसंसस्य वर्णो न द्वर्णायोरितराव्यवधाने भवति चत्त्वीदृष्यतरस्यादौ नरकारा
न्तर्गतरेफस्योतस्यानुभागेनव्यवधानान्नान्यसरेहास्य भव इतिनतत्रैतत्परिभाषाप्रवृत्तिरतएव न
संप्रसारणे इत्युदाहरणीभूतस्य विद्धइत्यादेर्नानुपपत्तिः अतएव न संप्रसारणे इति सूत्रसार्थक्यं ।।

अतएवचि

स्वदेशाः साभीप्यं

स्त्वा

राम
६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

336

नैतस्याः परिभाषायाः प्रयोजनानीति तत्सूत्रस्थभाष्यस्यतयमर्थः एतत्सूत्रसाध्यानि विवृद्दस्यादी
न्युदाहरणानि नैतस्याः परिभाषायाभवन्तीति अभ्यासदशाभावादिति चतद्भावः परस्यैवेति दृष्टा
दृस्यैवेत्यर्थः अः से रिति अत्र अकारेणाकारस्यापि ग्रहणं तेनाभूद्दगिसादिसिद्धिः तत्रत्यासर्वना
म्न इति पूर्वपदान्तस्यात्वं स्वसाघसेति सदादीनामसविषयइत्यर्थः पक्षेसति अत्रतत्रैणार्थद्वयेपिसूत्र
नास्त्यर्थेतत्रक्ष्या लन्नुरोधाद्व्यवस्था अत्रप्रमाणमुपन्यस्यति उक्तंचेति तत्सवदिति चत्तीकृप्यतेरत्सत्रयथा
नेतरीगृकारयोर्भवतितथेत्यर्थः अत्रादमुयङ्ङितिरूपवादिमतं न्यायपुतत्न सेऽक्षरीश्येत न्यायात्प्रवृ
त्तावपि अत्रैतदप्रवृत्तौ मानाभावात् अतएवभाष्ये दसो नोस्त्रेरिति वार्तिकप्रत्याख्यानापाथवा सेरिति
पक्षमुत्क्वाय द्वैवमयमुयङ्ङिति न सिध्यति अदड्यङ्ङिति प्राप्नोति अदमुयङ्ङितिभवितव्यमनन्यविका
रइति उक्तं अत्रैति प्राप्नोतीत्युक्तत्वाच्च नत्वासंमतिरजरू इतिभवितव्यमित्यनेन पृथक् मुक्तमिति पक्ष
समस्य भावो दर्शितः इतिभवितव्यमित्युक्तत्वाच्च तत्रशाह्ले प्रयत्नं च सूचितमित्याह त्रिषुरेवयोः वि
मिति च स्याप्युपलक्षणमिदं ननूत्तरपदाधिकारादद्युत्तरपदे इत्यर्थो द्विषगच नमित्यादेव्यावृत्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नलोपो यस्येति समासे अव्ययार्था वर्तिलामेसूत्रं कुंच्यादित्वकल्पनेमानाभावात्

न॰टी॰
११६७॥
य

अन्यथा तः चूरस्यत्र निर्युसमासस्य यतो नुवृत्तस्य समासग्रह
व्यर्थमप्रसंगग्रहणमत आह अव्ययेति तेनेति। अन्यथा तः चूरस्यत्र निर्युसमासस्यतो नुवृत्तस्य समासग्रह
तोनोत्तरपदार्थे विपि कृधातुरूपे उत्तरपदे इत्यर्थापत्तावयस्कू इत्यादावेव स्यादिति भावः इदइत्यत्राचे
इत्यनुवर्तते समः सासंयोगिति तिसम इगिति वानरतं परिभाषा तात नकृतगोरवापत्तेः॥ तिरसस्ति
अलोपरस्यत्र शकंध्वादित्वात्पररूपेण वृ॰ १२ः अश्लिल ते अस्य अलोपो लोपाभावो यत्सिद्धं चता
विस्यर्थस्तदाह अलुमाकारेति तिरश्चेति शचोः लोपस्य स्थानिवत्तुनपूर्व त्रासिद्धीयतत्रिषे
धात्पूजार्थस्येति पू जारूपार्थस्य गम्यत्वेरस्यर्थः अतएवाव्याकुलं गच्छतीत्यर्थ केचितंगच्छती
स्यादौ नलोपोन अव्याकुलगमनेन न च पूजा गम्यतेनलं चतेरवसोर्थः इति स्पष्टमचो न पादानेइति
सूत्रे भाष्यकैयटयोः प्राङरत्यादि चिरंतनादिरूपस्येति बोध्यं एतेनांचेगतावितिनियमेनेवसि
हौ नांचेः पूजायामिति व्यर्थमित्यपास्तं नलोपाभाव इति औपधत्वबोधन द्वारेत्यर्थः स्पष्टचेद
परेश्चवीति सूत्रे भाष्ये अपिनाच समवधाने चोः कुरिति कुत्वाभावो निरुपपदाक्विन्निति च निपा
स्यल इति बोध्यं सङ्गितिवचनाद्वा कुत्वाभावः षस्कोरिती तिसलोपेषत्वस्यासिद्धत्वात्सलोपे रूते

रामः
६७

षसंप्रश्चेः क्विपि ग्रहिज्येति संप्रसारणे पूर्वत्वे श्च ह्रस्वा । सिद्धत्वात्सलोपः स्तुवृद्धिरिति चर्त्वस्यासिद्ध
त्वात् । सीति वा घुट् निपात्यते इति अतिप्रत्ययांता इति शेषः तत्र पृषद्बृहतो र्गुणाभावश्च गमेर्जगा
देशश्च महेः कर्मणि प्रत्ययश्च निपातनात् शतृवदिति प्रत्ययग्रहणपरिभाषया शतृप्रत्ययान्तव
दित्यर्थः शतुरनुम इति सूत्रे बृहन्महतोरुपसंख्यानमिति तु पृषदादिव्यावृत्तये नियमार्थमिति बोध्यं ॥
अत्वसन्त चेत्यर्थे अतु इति लुप्तषष्ठीकं पृथक् पदं अधातोरित्यसंतस्यैव विशेषणं तु शाह्वानदाह धातुभि
न्नेति अत एवोगिदचामिति सूत्रे गोमत्यतेः प्रत्यये गोमानिति प्रयोगो भाष्ये संगच्छते अंगविशेषणं
तपार्थसिद्धं तदन्तविधेरेवानुवादकमंतग्रहणं परमिति वचनसामर्थ्यादुपधापदासंबंधेन चारितार्थ्या
दित्यभिमानः अयमभ्युच्चय इत्याह नित्यमिति कृताकृतप्रसंगित्वमात्रेणेत्यर्थः सामर्थ्यादिति वाक्या
र्थबोधकाले विरोधाभावेनोपधया संबंधे कृते सामर्थ्यात्पूर्वं दीर्घप्रवृत्तिरेव कल्प्यत इति भावः धीमानिति न
न्वेकानुबंधकपरिभाषया मतुपोऽत्राग्रहणं सूत्रं तु सर्वादिपठिते नुनासिकोकारविशिष्टे पवतुशब्दे चरितार्थ
मिति वाच्यं पकारादेः समुदायानुबंधत्वेप्यनोऽनुबंधकत्वाभावात् अवयवानान्तरीयकत्वात् समुदा

329

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनस्नार्थस्यप्राङ्भाष्यलीयनङीत्र

ल॰शे॰ ॥६२॥

योपदेशएवञ्चषिणात्पर्यमित्यर्थस्यादेचउपदेशइतिसूत्रस्थभाष्यसंमतत्वेनयदुपदेशप्रयुक्तायस्येत्संज्ञा
तस्यतदनुबंधतायाएवस्वीकारात् नचोकारलोपेपितत्वस्याप्यभावः उकारस्याश्रयत्वेनतदंशोभूतपूर्व
गतिस्वीकारात् एतेनतदाश्रयणेऽनुबन्तमेतन्नालंतमित्यपास्तंतदाश्रयणाभावात्॥ तस्मादनुना
सिकोकारविशिष्टोयउपदेशेऽनुतदंतस्यप्रयोगस्थस्यदीर्घइतिसूत्रार्थइतिनदोषः नियमा
र्थमिति धातोश्चेदुगित्कार्यंतर्हि नलोपिनोंचतेरेवेतिनियमइतिभावः तेनोखास्रत्ब्राह्मणी
पादेनुमूङीपोने न्यायप्राप्तान्नलोपाकरणपूर्वकंनलोपकरणस्यविवक्षार्थत्वमित्याशयः यद्य
पिअंचतेश्चेन्नलोपिनएवेतिनियमेप्यञ्चतिग्रहणंचरितार्थं तथापिभाष्यप्रामाण्येन सामा अ
न्यापेक्षउक्तनियमोयुक्तइतिबोध्यं नन्वेवंधातुसाकथंनुमत आह धातोरितिनचोपदेशिकधा
तुविषयकएवनियमोस्तुकिमनेनेतिवाच्यं औपदेशिकत्वानंतर्भावेण सामान्यापेक्षनियमज्ञा
पनार्थत्वात्सफलंपर्णध्वदित्यादाविवगोमानित्यादिनामधातावुगितश्चेतिङीवभावइतिदिक्॥

राम
६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्यपक्षेऽल्लोपेन स्थानिवत्त्वं लुप्तसत्वात् भत्राचारश्चिन्त्य अर्वाचीनमतेन वस्तुतो हलन्तेभ्य इत्यत्र भाव
इति न्हस्वनद्यापरत्वं सूत्रभाष्ये स्पष्टं उक्तेअ(लक्ष्यानुसारेण गर्गादि इन्न्यायादत्रैसमुदायेपूर्वाकृत्स्समाप्ति
रिसाहं उभे समुदिते इति द्वैरस्यानुवृत्त्येवसिद्धे उभेग्रहणं स्पष्टार्थं यत्तु उभेग्रहणं सामर्थ्यात्सहभावो
पसर्जनं द्विसविशिष्टार्थवृत्तेन समुदिते इत्यर्थलाभ इति तन्न अशहार्थत्वात् शब्दा धिकारादर्थाधिकृ
स्य बहुशो भाष्यकृतोपहसितत्वाच्च ध्वनितं चेदं तदसति प्रयोजने उभेग्रहणं सहार्थं विज्ञास्यत इति ग्र
स्थेन भाष्ये अत एव सूत्रशेषे भाष्ये गर्गादिइन्न्यायेनैतदर्थं सिद्धिमाश्रित्य संग्रहणं कर्त्तव्यमिति वार्त्तिकं प्र
त्याख्यातं तुल्यन्यायात्तदर्थकृत्वेन पराभिमतमुभेग्रहणं च प्रत्याख्यातमेवेति सुधियो विभावयन्तु त्र व्या
दिशाद्धूनामेकापायेऽप्रवृत्तेरैत्सं निसादावभ्यासलोपे कार्यकालपक्षे न संज्ञेति न नुसू एकादेशात्पूर्वमा
यनादिषु पदेशिवद्वचनेनानुरङ्ः साद्वंतादेशोपि सर्वे सर्वपदादेशा इति न्यायेन स्थानिवद्भावात् सिद्धेन
गुसापत्तिः ॥ किंचैकादेशो नुसोपवादविषयस्यानायमानसेन प्रकृत्य चापवादविषयमिति न्यायेन पूर्वमति
ति

३५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ शे॰
६९॥

भावात्प्रवृत्तेरेकादेशानुसापत्तिः यथोद्देशे पूर्वं समुदाये प्रवृत्तसंज्ञायाः स्थानिवद्भावेनाभ्यासल्लोपे सत्त्वेपि पं
त चमीसमासे नैकादेशस्य स्थानिवत्त्वान्न निवृत्तिरत एव प्रत्यें षिष न्नित्यादौ न दोषइत्यन्ये नाभ्यस्ता व ह
योगव्यवच्छिन्नोपि नुमिहानुवर्त्तते सामर्थ्यात्तदाह नुमेति दाञः शतरि शपः श्लौ अभ्यस्तानामिति च्छिन्नेभ्या
स ह्रस्वत्वे भ्राभ्यस्तयोरित्याल्लोपे ददतीति त्यदादिषु आलोचनमिह ज्ञानमात्रं भास इत्य इवत्तु ष्विति
सूत्रमनुवर्त्तते षत्वापवादत्वादिति कुः क्विन्यत इति न्यासे न दृष्ट इत्यध्याहारेण च बहुव्रीहि फले सिद्धे प्रत्य
यग्रहणेनान्यपदार्थांशे वीप्सा गर्भ बहुव्रीहिणा लब्धं ताहृशादि क्विनंत विषयं लक्षणमचरितार्थमिति
भावः एवकारइति अघोषमहाप्राणतुल्यत्वादिति भावः कैयटेति क्विन्प्रत्ययस्येति सूत्रस्थे स्यादिः अति
दृत्वादितियद्यपि नश्चापवादोपि कुत्वे तथापि शस्थानिक नश्चस्येव न तु खस्थानिकस्यापीति भावः व
स्तुतइदं चिंत्यं प्रत्ययग्रहणस्य बहुव्रीहि मात्रफलकताया एव भाष्यकृतोक्तेः तस्मात् धृक् अस्त्र पुलिंकु इः
षुअस्पस्वारितार्थ्ये नश्चत्वषत्वापवादता न युक्तेति तदेतन्मत इतिवदतास्स्व चित मिति दिक् नशिति षे उ

राम
६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति

गकारः प्राग्वत् नग ध्याभिति माल्लिनशोरिंनुम्नन धातुप्रत्यये तद्विधानात् स्पृशोऽनु अनुदके किंउदकस्पृड्॥
अन्तोदात्तत्वमिति नित्यादिरघुदात्तत्व प्राप्तं कुत्सस्य जश्त्व प्रत्ययसिद्धत्वादहकुत्वात्पूर्वमिति वीरः सिपि धातोरि
त्यतो धातोरिति वर्त्तते तच्चर्यीभ्यां विशिष्यते पिपठिषतेः क्विपि अतो लोपे प्रातिपदिकत्वात्सो हल्ड्यादिलोपे ल्
प्रत्ययलक्षणेन पदान्तत्वाद्रुः रुत्वे लोपो न स्थानिवत्पूर्वत्रासिद्धे न त्रिषेधात् इच्छि इत्को रिति वर्त्तते व्यव
पसंतुआदेशप्रत्य कारिलनेन धानेऽप्रामेरिदं प्रथमस्याधिकारः अतएव निसखेयत्ते धातोः सस्य नानेन षत्वं व्यवायशब्दस्य प्रत्येकं संब
धो व्याख्यानात्तदाह प्रत्येकमिति अपिनाऽव्यवधानेपि नुमस्थानिकेति प्रभूतसूत्रस्य हयवरट्सूत्रस्थ युभा
ष्यमत्र मानं अश्वेतिषड् इति सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतापात्रिपादीस्थस्याप्रवृत्ते हल्ड्यादिलो ल्
पोत्तरं विविशास्त्रत्ववस्थायां षत्वस्यासिद्धत्वात्संयोगान्तलोपे षड्त्यर्थः वलोपइति पदान्तसंयोगादिलोप
स्य संयोगान्तलोपापवादत्वादिति भावः तदिति तक्ष्णोतेः क्विप् ण्यन्ताभ्यामिति णिलोपस्य स्थानिवत्वा
गा त्कुत्वस्थानेत्वादोसंयोगादिलोपाप्राप्तेः काष्ठशगेव नास्तिकुतः काष्ठशकुत्स्थानेति परेत्रयाणां कुयोरिति सूत्रस्थ
भाष्येण न विरोधः तत्र झलपरसंयोगादिलोपमाशंक्य तथोक्तं तस्य दोषइति क्तोलुप्तमिति तुनसार्वत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰ शे॰
॥७०

क्मितिभावः इत्यन्यत्र विस्तरः कुत्वस्यासिद्धत्वादिति पिपक्षुरित्यवस्थायां कुत्वस्यासिद्धत्वात्तदभावे स्कोरि ६
त्यस्याप्राप्तेः संयोगान्तलोप इति भावः दिधगिति दादेरिति घः एकाच इति भष्भावः विद्वानिति विदेः श
तुर्वसावदादित्वाच्छपो लुकि शतुर्ङित्वाद्गुणाभावे उगिदचामिति नुमि सान्तेति दीर्घे संयोगान्तलोपे तस्यासिद्धत्वान्न
लोपो न वसोः प्रत्ययग्रहणात् तदन्तग्रहणात् भस्येत्यधिकारस्तदाह वस्वन्तस्येत्यादि नच विदेः शतुर्वसोरकानु
सेदिवानिति नन्तस्यादि बन्धकत्वात्तस्यैवात्र ग्रहणं स्यान्न लिडादेशक्वसोरिति वाच्यं वसुरादेशेन तस्यापि सानुबन्धकत्वात् इति भाष्ये स्पष्ट
विदुष इति संप्रसारणपूर्वत्वस्य षत्वं तुकोऽसिद्धत्वं लुनपदान्तपदादीरेकादेशस्यैव तेनासिद्धत्वात् सेदिवा
निति षद्लृधातोर्भाषायां सदेति लिटः क्वसौ द्वित्वे अत एकहल्मध्येऽनादेशादेरित्येत्वाभ्यासलोपयोर्वस्वेकाजादितीट् अथ सेति
परे तु पदादिविधिरिति व्याख्याने सेदुष इति स्थिते इट्संप्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन इड्बाधोऽपि स्थि
तिकसात्पूर्वं संप्रसारणे वलादित्वाभावादिटः प्राप्तिरेव नेति सेदुष इत्यादि सिद्धिरित्यरुक्तवाह परिभाषानि
ष्ठत्वात्तल्लक्ष्यानुरोधात्पदादिविधिरेवान्वाख्यानमित्याहुः साहचर्यादिति नच महत्यन्ते क्विपि महतो

शम
७०

सिधातुत्वसंभवइतिवाच्यं औपदेशिकधातुत्वासंभवेन तत्साहचर्येणौपदेशिकधातुभिन्नसान्तसंयोगस्यग्र
हणमित्याशयात् सुहिंसिति नान्तलक्षणो दीर्घस्तु संयोगान्तलोपस्यासिद्धत्वान्न हिंसीस्यस्येदित्वादनिदि
तामितिनलोपो न ध्वदिति॥ ध्वंसु ध्वंसु अवस्रंसने क्विप् अनिदितामिति नलोपः। विवक्षितमिति भा
ष्ये असुङ्यु पदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वादित्युक्तेरिति भावः वस्तुतो वचनमेवव्याप्यः वि
वक्षितसप्तम्यामपि विभक्तिबुद्धिनिमित्तत्वेन बहिरङ्गत्वात्ततः पूर्वं परमपुमानित्यादौ स्वरप्रवृत्तौ दोषात्
बहुपुंसीति विभक्तौ लिंगविशिष्टग्रहणान्नासुङ् विभक्तिविवक्षायां लिंगकार्यात्तरमेव समासेन ङीपः प्रा
गसुङिति भावः पूर्वत्र इति पाते शितिपाठान्तरं क्रियायामितिसूत्रे भाष्ये लुप्तेः सस्यपः ह्रस्वः सुन्नस्य पद्रुतु
नं वस्तुल उच्चारणार्थो नामधीसंज्ञावश्यक[illegible]हृदियमुक्तिः निष्ठुला पुमानिति सान्तेति दीर्घः उशनेति
वशेः कनसिग्रहिज्येति सम्प्रसारणं अस्य संबुद्धाविति एतत्सूत्रं तौ वाचनिकं पठितवशाधातो माधवस्तु संबो
धनेतु उशनस्त्रीरूपं सान्तं तथा नान्तं यथा पदं नमिति श्लोकवार्तिकमित्याह भाष्यानुक्तत्वादिदमप्रमा
णमेवेति प्रामाणिकाः उशनाशुक्रः अनेहा कालः नञि हन एह च स्य सुनूहना[illegible]दंशश्च सुवरति अधावो

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा घलस्य दस्य मि श्रेषपिति तेन कानि रकाराणां तु धक इति तना साक च्चे [illegible] मस्य चाहिता ध्यात् दिसाहुः ॥

प्र॰ कौ॰
॥८१॥

रित्यस्य धात्ववयवभिन्नासन्तस्येत्यर्थ इति भावः अन्यथा समुदायस्य धातुभिन्नत्वाद्दीर्घः स्यादेवेति बोध्यं अ
दस औ अदस इति षष्ठी तदोः सः इत्यतः साविति वर्त्तते ननु सौ औ इत्येवास्तु इति चेन्न असाविस्यत्र टिलोपे कृते
नित्यत्वात्सत्वं बाधित्वात्स्यदाद्युत्वे सौ वित्यसिद्धेः असुक इति असुकाविसादौ सर्वनाम्नो दः शब्दपर्यायोऽमुकश
ब्द इत्याहुः एतदर्थं बहुवचनशब्दो यौगिक इत्याह बह्वर्थेति तेनामी इति सिद्धं पश्चादुत्वेति उत्वेसुपलक्षणामी
त्वस्यापि ननु मुत्वस्यासिद्धत्वात्कथं नाभाव इत्यत आह नमुने इति कर्त्तव्ये कृते चेति एवं च नेति विषयसप्तमीति भा इति
वः भाष्ये तु ने परत्वार्थं तत्रासिद्धत्वं नेत्यर्थे ने च नाभावो प्यादिक्षिप इति व्याख्यातं मु इति समाहारद्वन्द्वः ऋते चेत्सु
ते मुं से सुपि चेति दीर्घो न अमीभिरिति नेदमदसो रित्येन ॥८॥ इति हलन्ताः पुल्लिङ्गाः ॥८॥ नहो धः
सन्तो झलीत्यतो झलीति पदस्येति स्को रित्यतोऽन्त इति चानुवर्त्तते झलि परे पदान्ते विद्यमानस्येत्यर्थः अलोऽन्त्य
स्येत्येतल्लभ्यं हस्येति उपपूर्वो णह बन्धन इत्यतः क्विप् नहि वृतीति पूर्वपदस्य दीर्घः सोढ इत्यादि ढलोपे धत्वजश्त्व रु
पर्सादि दलोप षसे इति पूर्वपदान्तस्य लोपो धातोः सस्य षत्वं आदेशप्रत्यययोरिति नु न षत्वं पदादादिरिति
य

रामः
८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निषेधात् हस्वग्रहणमिति वै पदादिमते बलस्येव ठत्तस्यापि कुलेन बाधादिति भावः उश्विग श्वित्रिति निर्देशात् त्तुं
तस्मन् श्वे नासिद्धत्वं स्वरीसात् ठ उगवाहृति बोध्यं घो रिति दिवउ्तो दियोसंपण चतस्व इति परस्ता दामं
बाधित्वा चतस्रादेशो सवइति व्यापासुन राष्ठ्र तिस्त्राणि वत्सत्रे भाष्ये चतसृणामिति न तिस्रिति दीर्घनिषे
ब धः सर्वाविदिति सर्वाद्याद्दिद्यर्थः अतएव सर्वनाम्नो वृत्तिमात्र इति न पुंवत्वं ड्यादृपरस्य वदापि सर्वनामत्वाभा
वादिति भावः यःसो पुंस्य पावा धात्ल्वी वे सोलुकालो पात्स्त्रियामिदं ॥ वागिति वचेः क्विप् वचीत्यादिना
क्विपुदीर्घो ऽ संप्रसारणंच अपोभि अचउपसर्गान्त इत्यतस्तत इत्यनुवर्तते अबिति न प्रत्ययो व्याख्यानात्
दिगिति दिशअतिसर्जने क्विप् घउगकः प्राग्वत् दिषगता वस्मात् क्विपुअभ्वचस्व अषी प्रीतीत्यतः क्विप्
सहस्यस भावे सहः अमूभिरिति अदन्तत्वाभावेन तद्दिस्यस्याभावे मूत्वमेव धेति हलन्ताः स्त्रीलिङ्गाः ॥
दत्वमिति नसूत्रस्त्वित्यस्य पदाधिकारस्थत्वात् तदन्तेपि दत्वमेव मांगसाहामपि पूर्वपदस्येवेति प्रत्ययल
क्षणेनेति भावः अतएव राजपुरुषादौ न लोपादिसिद्धिः उत्तरपदत्वे चेति उत्तरशब्देनोत्तरपदं लक्ष्यते

लघु॰शे॰
७२

उत्तरपदशब्दस्य समासचरमावयवे रूढः तेन तस्य पदत्वे तत्प्रयुक्तकार्ये कर्तव्ये लुप्ते प्रत्ययलक्षणं
